सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 344 Foll. $10\frac{1}{2} \times 5\frac{1}{4}$ inches. 13 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

The leaves are arranged into three groups each group containing separate pagination. The first group has 180 leaves, the second 103 and the third 61.

The well known work on Pāṇini's grammar explaining the Sutras of the Aṣṭadhyāyi with illustrations. The Sūtras are herein dealt with after recasting so as to suit the context and to facilitate the readers in the formation of words. The author Bhaṭṭojidīkṣita was the son of Lakṣmīdhara and the brother of Raṅgojibhaṭṭa whose son was Koṇḍubhaṭṭa, the author of the Vaiyākaraṇabhūṣaṇa and Sāra thereof. It is said that Bhaṭṭoji was the pupil of S'eṣa Kṛṣṇa the author of the Prakriyāprakās'a, a commentary on the Prakriyākaumudī. He is assigned to the 17th Century A.D.

Contains up to the end of Kṛtprakaraṇa.

Beginning :

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश्

खफछठथचटतव् । कपय् । शषसर् । हल् । इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । लण्सूत्रे अकारश्च । हकारादिष्वकार उच्चारणार्थः । हलन्त्यम् । हलिति सूत्रे अन्त्यमित्स्यात् ।

End :

अन्वच्यानुलोम्ये । अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने । अन्वग्भूयास्ते । अन्वग्भूत्वा । अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्त इत्यर्थः । आनुलोम्ये किम्? अन्वग्भूत्वा तिष्ठति, पृष्ठतो भूत्वेत्यर्थः ।

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥

Colophon :

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम ॥

संवत् १८९८ आषाढादि ९९ शके १७ प्रवर्तमाने पौषशुद्ध १२ भानुवासरे लिखितम् । दलपतिरामेण आत्मराम आत्मपठनार्थं परोपकारार्थम् ।

The front page of the first leaf contains a few passages from Uṇādi portion of the work and the following stanzas :

"अतिथिविबुधमैत्री राजसेवाग्निहोत्रं
ग्रहगणरणरोगालोकवार्तेन्द्रियाणि ।
अहेरिव धनाद्भीतो मिष्टान्नाद्भूरलादिव ।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥
आलस्यं मन्दबुद्धिश्च दुःखितो व्याधिपीडितः ।
निद्रालुः कामुकश्चैव षडेते शास्त्रघातकाः ॥"

179. 8. H. 15.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 150 Foll. 12½ × 7¼ inches. 22 lines in a page. Grantha scripts. Old. Good writing.

Breaks off in the Taddhitaprakaraṇa.

At the beginning the following stanzas are written.

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥
वार्णी पाणिनिमाचार्यं कात्यायनमुनिं तथा ।
कृताञ्जलिर्नमस्यामि भगवन्तं पतञ्जलिम् ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

The name of the former owner of the M.S.—Sundara Ayyar of Mandakolattur.

180. 9. D. 24.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 55 Foll. 9¾ × 5 inches. 12 lines in a page. Devanāgarī scripts. Old. Injured. Good writing.

Begins in the Vaidikaprakriyā and goes on up to the end of Lingānus'āsana.

Beginning :

छन्दसि पुनर्वस्वोरेकवचनम् । द्वयोरेकवचनं वा स्यात् । पुनर्वसु नक्षत्रम् । पुनर्वसू वा । लोके तु

द्विवचनमेव । विशाखयोश्च । प्राग्वत् । विशाखा नक्षत्रम् । विशाखे वा ॥ षष्ठीयुक्तश्छन्दसि वा । षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि घिसंज्ञो वा स्यात् । क्षेत्रस्य पतिना वयम् । इह वेति योगं विभज्य छन्दसीत्यनुवर्तते । तेन सर्वे विधयः छन्दसि वैकल्पिकाः । बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः । यचि भम् । नभोऽङ्गिरोमनुषां वेत्युपसंख्यानम् । नभसा तुल्यं नभस्वत् । भत्वाद्रुत्वाभावः । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने ।

End :

अव्ययं कतियुष्मदस्मदः । ष्णान्ता संख्या । शिष्टा परवत् । एकः पुरुषः । एका स्त्री । एकं कुलम् । गुणवचनं च । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् । कृत्याश्च । करणाधिकरणयोर्ल्युट् च । सर्वादीनि सर्वनामानि । स्पष्टार्थेयं त्रिसूत्री ।

Colophon :

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धे पाणिनीयलिङ्गानुशासनसूत्रवृत्तिः समाप्तिमगमत् ।

The former owner of the MS :

अहोबलाध्वरिसुतनृसिंहसोमयाजिनाम् ।

181. 9. E. 65.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 9 Foll. 17¾ × 4 inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Contains a fragment of Taddhitaprakaraṇa.

182. 9. E. 72.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 58 Foll. 17¾ × 4 inches. 15 lines in a page. Telugu script. Old. Good. Good writing.

Contains from the S'abdādhikāra to Samāsaprakaraṇa and a very small portion in the beginning of the Uttarārdha.

183. 19. F. 8.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 193 Foll. 10½ × 1½ inches. 16 lines in a page. Telugu script. Old. Slightly injured. Good writing. Wooden boards are added to both sides.

Contains up to the end of Svaraprakaraṇa.

At the end of Pūrvārdha the following stray stanzas are written :

" नूनं पुरा परिचचार महेश भूयो
येनाधुना परिचरामि भवन्तमेव ।
भाविन्यसौ परिचरेय जनुष्यवश्यं
भावत्कभक्तिरसिकस्य भवो हि भक्तिः ॥
ज्ञानतोऽज्ञानतो वापि कृतं यत्प्रेरणान्मया ।
तत्तत्प्रीत्यै सदा भूयात्तेन तुष्टः स मावतु ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥
यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ "

The fly leaf at the end contains the following stray stanzas :

" त्यजेद्देशमधर्मस्थमप्रियं बान्धवं त्यजेत् ।
त्यजेद्दारानसद्वृत्तान्वृत्तिं सोपद्रवां त्यजेत् ॥
त्यजेत्कृपणराजानं मायाबन्धुं परित्यजेत् ।
त्यजेदवृत्तिकां भूमिं वृत्तिं सोपद्रवां त्यजेत् ॥

निर्दयराजा व्याघ्रसमानो निर्दयनारी मृत्युसमाना ।
निर्जलभूमिररण्यसमाना निर्धनपुरुषः शष्पसमानः ॥
नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥
महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ॥
क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारपूर्णोदराः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं बाडवा
जीमूतस्तु निदाघसंहृतजगत्संतापविच्छित्तये ॥"

184. 19. F. 10.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 140 Foll. 17 × $1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Pūrvārdha complete.

The following stanza is added at the end:

"श्रीरामचन्द्रपदपङ्कजदर्शनेन
संरम्भबुद्धिसहिताः प्रभवन्ति सन्तः ।
अन्यान् विधीनपरिगणय्य शिवं सदास्म-
त्तीर्थस्य पादभजनात् सुधियो लभन्ते ॥"

185. 19. F. 11.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 183 Foll. $12\frac{3}{4}$ × $1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Much injured. Illegible writing.

Contains the Uttarārdha almost complete.

186. 19. F. 12.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 104 Foll. 16 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Uttarārdha only breaking off in the Curādiprakaraṇa.

The former owners of the MS—Mudumbai Rāghavāchārya, Kṛṣṇasvāmi and Vangipuram Gopāladeśikan.

187. 19. F. 14.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 94 Foll. 13 × 1 inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains a fragment of the Uttarārdha.

The former owner of the MS—Śrīraṅgarāja of Cheyyūr.

188. 19. F. 15.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 85 Foll. $13\frac{1}{2}$ × $1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Begins in the Kārakaprakaraṇa and goes on up to the end of Pūrvārdha.

189. 19. F. 16.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palml-eaf. *72* Foll. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Breaks off in the Samāsaprakaraṇa.

190. 19. F. 17.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 104 Foll. $16\frac{1}{2} \times 1$ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Breaks off in the Taddhitaprakaraṇa.

191. 19. F. 18.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 144 Foll. $14 \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

The leaves are in disorder.

Breaks off in the Samāsaprakaraṇa.

192. 19. F. 19.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 142 Foll. $16 \times 1\frac{1}{2}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Taddhitaprakaraṇa.

193. 19. F. 20.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 59 Foll. $15 \times \frac{1}{2}1$ inches. 8 lines in a page. Grantha script. Old. Injured. Legible writing.

Contains the Taddhitaprakaraṇa and Dviruktiprakaraṇa incomplete.

194. 19. F. 21.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 43 Foll. $13\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the Kāraka and Samāsa prakaraṇas.

195. 19. F. 22.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 69 Foll. 15×1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Begins in the Taddhita and goes on up to the end of Pūrvārdha.

196. 19. F. 23.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 63 Foll. $15\frac{1}{2} \times 1\frac{1}{8}$ inches. 6 lines in a page. Telugu script. Injured. Clear writing.

Contains up to the end of Kāraka-prakaraṇa.

Foll. 64 to 68 contain a small portion of S'abdādhikāra (in duplicate) and of Tiṅantaprakaraṇa of the work.

Foll. 69 and 70 contain the following stanzas from the Karmavipāka :

" कर्मविपाके मूत्रकृच्छ्रहरपद्मदानम् । तत्र निदानं वायुपुराणे—सुरापो मूत्रकृच्छ्री स्यात् । तन्निष्कृतिमाह बोधायनः—

सौवर्णं कारयेत्पद्मं पलेनार्धपलेन वा ।
यथास्वशक्ति मतिमान् दृढमष्टपलं शुभम् ॥
वित्तशाठ्यं न कुर्वीत भवेन्निष्फलमन्यथा ।
तिलद्रोणाविति केनापि . . ताम्रं तिलान्वितम् ॥

निदधीतेति शेषः । तिलराशौ जलपूरितं ताम्रपात्रं निदधीतेत्यर्थः ।

पात्रमध्ये तु तत्पात्रं विदध्यात्कुङ्कुमान्वितम् ।
ब्राह्मणं श्रुतसंपन्नं दरिद्रं चाग्निहोत्रिणम् ॥
आहूय गन्धमाल्याद्यैर्विधिना चातिभक्तितः ।

अर्चयेदिति शेषः । एवं ब्राह्मणमभ्यर्च्य नवं भास्करं पद्ममध्ये पूजयित्वाग्निं प्रतिष्ठाप्य तत्पद्मं ब्राह्मणाय वक्ष्यमाणप्रकारेण दद्यात् । तथाच बोधायनप्रोक्ते—

पद्मे चावाहयेद्देवं भास्करं ग्रहनायकम् ।
एह्येहि भगवन् देव पद्मेऽस्मिन् संनिधिं कुरु ॥
त्रयीतनो द्वादशात्मन् सहस्रैर्हेतिभिर्वृतः ।

इत्यावाहनमन्त्रः ।

आवाह्य तस्मिन् देवेशं पूजयेद्रक्तचन्दनैः ।
पुष्पैश्च रक्तैरपरैः कुङ्कुमागरुचन्दनैः ॥
नैवेद्यं पायसं दद्यादलाभे क्षीरमेव वा ।
आज्यहोमस्तिलैर्होमः कार्यश्चाष्टोत्तरं शतम् ॥
मन्त्रैर्व्याहृतिभिर्हुत्वा होमशेषं समापयेत् ।
ततः स्वर्णमयं पद्मं दद्यान्मन्त्रेण संयुतम् ॥

दानमन्त्रः—

खगः पूषा पतङ्गोऽसौ द्वादशात्मा त्रयीतनुः ।
पद्मेनानेन दत्तेन प्रीतस्तरणिरस्तु मे ॥
दत्तेनानेन मनुजो मूत्रकृच्छ्रात्प्रमुच्यते ।
मूत्रकृच्छ्रातुरस्तस्मादेतत्कुर्यात्प्रयत्नतः ॥
ब्राह्मणान् भोजयेत्पश्चात्फलभक्ष्यादिसंयुतम् ।

पद्मदानप्रकारं च आदित्येऽहनि कारयेत् । इत्याह भगवान् बोधायनः । "

Fol. 71 contains the following stanzas:

" श्रीमद्भोजधरामरेन्द्र सुगुणालंकार दृग्धोरणी
यं ते द्रागनुरागिणी श्रयति सासूयेव तत्संगता ।
तं संत्यज्य दरिद्रता गुरुकलत्रासक्तिमन्तं श्रिता
योषिन्मध्यमसौ कुचेलसहितं जारा न किं वाचरेत् ॥
सन्मार्गे निबिरीसशार्वरगणैर्नीरन्ध्रतां प्रापिते
त्वं वेगादवतीर्य लब्धशरणं पाता नु रक्तं सदा ।
त्वन्नामस्मरणाद्भवन्त्यनिमिषाः सर्वे भवानादिमो
नान्त्यो मत्कुण तुल्य एव हरिणा श्रीवास एकोऽस्ति चेत् ॥

Foll. 72 to 78 contain Vyākaraṇakrodapatra.

Foll. 79 to 86 are left blank.

197. 19. F. 24.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 52 Foll. 15½ × 1¼ inches 7 lines in a page. Telugu and Grantha scripts. Old. Slightly injured. Good writing.

Contains the Uttarārdha up to the end of Curādi.

The fly leaf contains the following stanzas:

" गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य न्याय्यो दण्डो विधीयते ॥
सिन्दूरारुणविग्रहां त्रिणयनां माणिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।

पाणिभ्यामलिपूर्णरत्न (चषकं) रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम् ॥
श्रीविद्यां शिववामभागनिलयां ह्रींकार . . . .
श्रीचक्रान्तरबिन्दुमध्यमशिखां श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं
. . . परदेवतां भगवतीं श्रीराजराजेश्वरीम् ॥"

198. 19. F. 25.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 82 Foll. 16½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains fragments of the S'abdādhikāra, Strīpratyaya, Samāsa and Tiṅanta prakaraṇas.

Seven extra leaves added at the end contain a small portion of the Tribhāṣyaratna.

199. 19. F. 26.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 71 Foll. 13½ × 1½ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a fragment of the Kṛtprakaraṇa and whole of the Vaidika and Svara prakaraṇas.

200. 19. F. 30.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 8 Foll. 12½ × 1 inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Contains the Paribhāṣā and Sandhi prakaraṇas.

201. 19. F. 31.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 41 Foll. 17 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the Taddhita and goes on up to the end of Pūrvārdha.

202. 19. F. 32.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 27 Foll. 15¼ × 1¼ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Breaks off in the S'abdādhikāra.

203. 19. F. 34.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 42 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Breaks off in the S'abdādhikāra.

204. 19. F. 35.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 12 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Much injured. Clear writing.

Contains a fragment of the Tiṅantaprakaraṇa.

205. 19. F. 36.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 15 Foll. 16½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains a fragment of the Taddhita-prakaraṇa.

206. 19. F. 37.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 39 Foll. 14½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Very much injured. Illegible writing.

Contains fragments of the Samāsa and Kṛt prakaraṇas.

207. 19. F. 38.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 50 Foll. 15 × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Breaks off in the S'abdādhikāra.

208. 19. F. 41.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 56 Foll. 16½ × 1½ inches. 8 lines in a page. Grantha script. Old. Very much injured. Good writing.

Contains a fragment of the Pūrvārdha.

The leaves are in disorder.

209. 22. C. 56.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 71 Foll. 14½ ×1¼ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains fragments of the Sandhi, S'abdādhikāra, Kāraka and Taddhita prakaraṇas.

210. 22. M. 67.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 36 Foll. 14½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Legible writing.

A fragment containing some stray leaves relating to the Sandhi, S'abdādhikāra and Samāsa prakaraṇas.

211. 23. B. 31.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 12 Foll. 17¼ × 1¼ inches. 7 lines in a page. Telugu script. Old. Good. Good writing.

Contains up to the end of the Sandhi-prakaraṇa.

212. 23. E. 1.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 146 Foll. 14½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the Uttarārdha which breaks of in the Uṇādiprakaraṇa.

The former owner of the MS.: Caṇḍamārutam Veṅkaṭaraṅgāchārya son of Hastigirinātha of Sundarapura.

213. 23. E. 24.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 56 Foll. $17\frac{1}{2} \times 1$ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in the S'abdādhikāra and breaks off in the Kārakaprakaraṇa.

Three extra leaves added at the end contain the following stanzas:

" बाह्यैर्वर्णाडम्बरैर्मा भ्रमन्तु
छित्वा गर्भाभ्यन्तरं शोधयन्तु ।
निर्णेतारो नीरसत्वेन को वा
डिण्डीराणां डिण्डिमानां च भेदः ॥
प्राज्ञानामेव राज्ञां सदसि न सहते जल्पमल्पेतरेषां
क्षुद्रेष्वाक्षेपमुद्रां न खलु गणयते डिण्डिमः सार्वभौमः ।
भांकुर्वद्भेककुक्षिंभरिषु भयभराक्रान्तभोगीन्द्रसुभ्रू-
भ्रूणभ्रंशी किमम्भःफणिषु पतगराट् संभ्रमी बम्भ्रमीति॥
स्पर्धन्तां सहजातिकुञ्जरतया दिक्कुञ्जरैः कुञ्जरा
बाह्या वा वनवासिनो मदजलप्रस्विन्नगण्डस्थलाः ।
आः कालस्य विपर्ययः किमु सखे प्राचीनपालीमला-
स्वादस्निग्धकपोलभित्तिरधमः कोलोऽपि संस्पर्धते ॥
द्विचतुष्पदपरिवर्तनपरिगर्वितकविशरभगण्डभेरुण्डः ।
खण्डनखण्डनकविरिह डिण्डिमगण्डडिण्डिमो जयति ॥
घोटीधाटीकठोरस्फुटविकटकथाटोपवाचाटकोटी-
कोटीराघाटपेटीपुटघटितमणी सङ्घसंघट्टिताङ्घ्रि ।
खर्वीकुर्वन् सगर्वां जयति कवितति सर्वतन्त्रस्वतन्त्रो
वेदान्ताचार्यधुर्यो विघटितजडधीसंकटो वेंकटेशः ॥
स्वर्गाद् गोपाल कुत्र व्रजसि सुरमुने भूतलं कामधेनो-
र्वत्सस्यानेतुकामस्तृणचयमधुना मुग्ध दुग्धं न तस्याः ।
श्रुत्वा श्रीभोजराजप्रथितवितरणं व्रीडशुष्कस्तनी सा
व्यर्थस्तर्हि प्रयासस्तदपि तदरिभिश्चर्वितं सर्वमुर्व्याम ॥
कीर्तिस्ते धनिका धनं मधुरिमा तस्याधमर्णा सुधा
शीतांशुः प्रतिभूस्तदर्थनकृते सैषा दिवं धावति ।
नूनं सा तव वाचि भोजनृपते चन्द्रो निरङ्घ्रिध्वनिः
शङ्कातङ्कभृदंशुकावृततनुर्नक्तं परिभ्राम्यति ॥
अल्लालक्षोणिपाल त्वदहितनगरे संचरन्ती किराती
कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशङ्काकुलाङ्गी ।
क्षिप्त्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रं धमन्ती
श्वासामोदानुयातैर्मधुकरपटलैर्धूमशङ्कां करोति ॥
युक्तं किं तव शर्वरीशमुख . . . . . .
रथ्यायामहरत्कथं तव कुचद्वन्द्वं मदीयं मनः ।
व्यत्यस्तं कुरुषे विधिं जहि जहि प्राणेश युक्तं वदन्
. . . . . कर्षणोद्यतकरः कृष्णः स पुष्णातु नः ॥
पीठे पीठनिषण्णबालकगले तिष्ठन् स गोपालको
यन्त्रा . . . भाण्डमपकृष्याच्छाद्य घण्टारवम् ।
वक्त्रोपान्तकृताञ्जलिः कृतशिरःकम्पं पिबन्यः पयः
पायादागतगोपिका . . . गण्डूषफूत्कारकृत् ॥

. . . .

मातः किं यदुनाथ + कृष्णः स पुष्णातु नः ॥
कस्त्वं बालक + कृष्णः स पुष्णासु नः ॥
अन्तर्गृहे कृष्णमवेक्ष्य + स्तिमिता बभूव ॥
के वा न सन्ति भुवि वारिरुहावतंसाः
हंसावलिप्रणयिनो जलसंनिवेशाः ।
किं चातकः फलमवेक्ष्य सवज्रपातां
पौरन्दरीं कलयते नववारिधाराम् ॥
अङ्गुल्या कः कवाटं + पातु मां पद्मनाभः ।
कस्त्वं शूली प्रविश भिषजां वेश्म वैद्यं न जाने
स्थाणुर्बाले न वदति तरुर्नीलकण्ठः प्रमुग्धे ।
केकामेकां वद त्वं पशुपतिरबले नैव दृष्टे विषाणे
इत्येवं शैलकन्याप्रतिवचनजडः पातु वः पार्वतीशः ॥
वाहव्यूहखुरक्षतां वसुमतीं संप्रेक्ष्य मूर्च्छावतीं
भेरीभांकृतिचञ्चलेन पयसा वारां निधिः सिञ्चति ।

दिग्बाला तनुते निजामनृपते वातं पताकाञ्चलै-
धूलीघोरणिरश्विनीसुतयुगं प्रष्टुं दिवं धावति ॥
नपुंसकमिति ज्ञात्वा + पाणिनिना वयम् ॥
यदस्थि . . . . . वंशस्थूणकचाकेशनखैः पिनद्धम् ।
क्षरन्नववद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥"

214. 23. E. 31.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 86 Foll. 17 × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the Uttarārdha which breaks off in the Sanprakaraṇa.

215. 23. E. 35.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 5 Foll. 16½ × 1½ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Contains the Kārakaprakaraṇa (without the beginning and end).

216. 23. G. 5.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 215 Foll. 16½ × 1 inches 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains from the Kāraka to Kṛtprakaraṇa.

Two extra leaves added at the beginning contain the following:

"दैवेन लिखिता रेखा ललाटेऽक्षरमालिका ।
तां पश्येत्स च दैवज्ञो होरानिर्मलचक्षुषा ॥
अर्केन्दुकुजराह्वार्यमन्दज्ञध्वजभार्गवाः ।
रक्षन्त्वेनं ग्रहाः सर्वे चापलग्नसमुद्भवम् ॥

स्वस्ति श्रीविजयाभ्युदयशालिवाहनशकाब्दाः 1667 कल्यब्दाः 4646 இதின் மேல் செல்லா நின்ற க்ரோதன வருஷம் ஆனி 9 உ பவ 12. விஷ்கம் 4. தை 17. வஜ்ர 47. पशुः प्रागुदितम्. இந்த சுப தினத்தில் 30 நாழிகைக்கு மேல் ஜனனம். ஜன்ம லக்னம் தனுஸ்ஸு. சந்த்ர லக்னம் கும்பம். தத்காலக்ரஹஸம்பத்து. लग्नात्सप्तमे आर्द्राद्वितीये मकरनवांशे रविः । लग्नात् तृतीये भ्रातृस्थाने शतभिषाद्वितीये मकरनवांशे चन्द्रः । लग्नाद्दशमे कर्मस्थाने हस्तप्रथमे मेषनवांशे कुजः । लग्नात्षष्ठे शत्रुस्थाने मृगशीर्षप्रथमे सिंहनवांशे बुधः । लग्नादेकादशे ज्येष्ठभ्रातृस्थाने स्वातीतृतीये कुम्भनवांशे गुरुः । लग्नात्सप्तमे कलत्रस्थाने मृगशीर्षाद्वितीये तुलानवांशे कविः । लग्नाद्दशमे कर्मस्थाने उत्तराचतुर्थे मीननवांशे शनिः । लग्नाच्चतुर्थे उत्तराभाद्राचतुर्थपादे वृश्चिकनवांशे राहुः । लग्नाद्दशमे हस्तद्वितीये केतुः । एवं ग्रहस्थितयः । இந்த சுப தினத்திலே வாத்யார் ஸ்ரீநிவாஸாசாரியர் குமாரர் கிருஷ்ணமாசாரியருக்கு ஜ்யேஷ்ட புத்ரன் ஜனனம்.

श्रीयुतप्रभववर्षमकरभानुवारयुते ।

. . . . . .

मूर्तये गुरवे श्रीश्रीनिवास + मङ्गलम् ।
तातदेशिकपादाब्जन्यस्तस्वात्मभराय नः ।
स्वामिने श्रीश्रीनिवास + मङ्गलम् ॥
परकालयतीशानप्राप्ततुर्याश्रमाय नः ।
नाथाय श्रीश्रीनिवास + मङ्गलम् ॥
शिखोर्ध्वपुण्ड्रकाषायत्रिदण्डालंकृतात्मने ।
ज्ञानाब्धये श्रीनिवास + मङ्गलम् ॥
पराङ्कुशो यतीशानो वेदान्तगुरुरेव वा ॥
इत्यूह्याय श्रीनिवास + मङ्गलम् ।

भगवद्भक्तिवैराग्यनिधये गुणसिन्धवे ।
शान्ताय श्रीश्रीनिवास + परम + मङ्गलम् ॥
तन्त्रेषु सम्यङ्निष्णातवादिगर्वापहारिणे ।
दान्ताय श्रीश्रीनिवास + मङ्गलम् ।
त्रय्यन्तगुरुसिद्धान्तस्थापनैकोत्सुकाय नः ।
निधये श्रीश्रीनिवास + मङ्गलम् ॥
ज्ञानभक्तिवचःसंपत् . . . . . . ।
. . . . . . श्रीवास + पर + मङ्गलम् ॥
सार्वज्ञ्यसत्यसंकल्पवात्सल्यादिगुणाब्धये ।
. . . . श्रीनिवासाय मङ्गलम् ॥
यत्पादपङ्कजं प्राप्य निर्भरो निर्भयोऽस्म्यहम् ।
. . . . . . ॥
अनाथो नाथवानस्मि यत्कारुण्यो . . . .
. . . . श्रीनिवासाय मङ्गलम् ।
मङ्गलाशासनं श्रीमत्परकालगुरोः पदे ।
समर्पितं पठेद्यस्तु स भवेन्मङ्गलाश्रयः ॥

217. 23. G. 37.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 63 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the Acsandhi and breaks off in the Tadditaprakaraṇa.

218. 24. A. 7.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 89 Foll. $14\frac{3}{4} \times 2$ inches. 12 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Begins in the Adādi and goes on up to the end of Kṛtprakaraṇa.

The fly leaf contains the Aniṭkārikās as found in the Siddhāntakaumudi.

219. 24. A. 24.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 165 Foll. $13\frac{1}{2} \times 2$ inches. 9 lines in a page. Malayālam script. Old. Good. Good writing.

Contains the Pūrvārdha complete.

220. 24. B. 17.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 159 Foll. $13\frac{1}{2} \times 1\frac{3}{4}$ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Bhvādi in Uttarārdha.

221. 24. C. 13.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 102 Foll. $14\frac{1}{8} \times 2\frac{1}{4}$ inches. 11 lines in a page. Malayālam script. Old. Good. Good writing.

Wants 12 leaves in the beginning of Bhvādi and goes on up to the end of Kṛtprakaraṇa.

The fly-leaf at the end adds the following stanzas :

अष्टाध्याय्यां सूत्रसंख्या—

"कमलं प्रथमेऽध्याये द्वितीये दन्तुरं पुनः ।
तृतीये कुगतिः संख्या चतुर्थे लगतीति च ।
पञ्चमे शिशुमान् संख्या षष्ठे संगस्थ इत्यपि ।
सप्तमे जलभूः संख्या तातगीरष्टमेऽपि च ॥
धीः साधुगा तु सर्वेषां सद्भिः संख्या प्रकीर्तिता ॥
351, 268, 631, 633, 555, 737, 438, 366.
आहत्य 3,979."

222. 24. F. 8.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 58 Foll. 15¼ × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the Kṛtprakaraṇa only complete.

Date of copying—प्रमोदसंवत्सराश्वयुजकृष्णत्रयोदशी सौम्यवासरः ।

223. 24. O. 10.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 63 Foll. 16¾ × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Begins in the Samāsaprakaraṇa and goes on up to end of the Pūrvārdha.

Date of copying : दुन्दुभिमार्गशिरबहुलद्वादशी.

Name of the scribe—Sūryanārāyaṇa-s'āstri son of S'eṣāvadhāni.

224. 25. A. 2.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 18 Foll. 16½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the Svādisandhi.

225. 25. D. 16.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 77 Foll. 15¾ × 1¼ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wants beginning in the S'abdādhikāra and breaks off in the Taddhitaprakaraṇa.

The fly leaf added at the beginning of the MS. reads the following stanzas :

वित्ते चतुर्धा दायादा धर्माग्निनृपतस्कराः ।
ज्येष्ठपुत्रावमानेन त्रयः कुप्यन्ति सोदराः ॥
लक्ष्मीर्लक्षणहीने तु कुलहीने सरस्वती ।
अपात्रे लभ्यते नारी मेघो वर्षति पर्वते ॥
अलिरनुसरति परिमलं लक्ष्मीरनुसरति नयगुणसमृद्धिम् ।
निम्नमनुसरति सलिलं विधिविहितं बुद्धिरनुसरति ॥
सत्यानुसारिणी लक्ष्मीः कीर्तिस्त्यागानुसारिणी ।
श्रद्धानुसारिणी विद्या बुद्धिः कर्मानुसारिणी ॥
पक्षद्वन्द्वविराजितोऽहममलो मीनप्रसेवी सदा
पुष्टाङ्गः सकला दिशः परिगतश्चन्द्रः समः किं नु मे ।
सर्वस्थाणुशिरोगतोऽहमिति तं चन्द्रं बको हासते
मात्सर्येण दुरात्मकोऽपि सुजनं दृष्ट्वा तथा हासते ॥
वृत्तिच्छेदविधौ द्विजातिमरणे वृत्तिग्रहे गोग्रहे
साधूनां व्यसने कलत्रहरणे मित्रापदां वारणे ।
ये शक्ताः पुरुषाः पराङ्मुखतया कुर्वन्त्युदासीनतां
तानालोक्य निरीक्षितुं मृगयते . . . . ॥

Three extra leaves added at the end contain a small portion of the Aṣṭādhyāyī.

The former owner of the MS.—S'rinivāsarāghavāchārya.

226. 25. E. 18.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 6 Foll. 13½ × 2 inches. 10 lines in a page. Malayālam script. Old. Good. Good writing.

Contains a fragment of the Vaidikaprakriyā.

227. 25. G. 14.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 151 Foll. 13 × $1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Uttarārdha up to the end of Lakārārthaprakriyā with the following colophon :

इति भट्टोजिदीक्षितकृतायां सिद्धान्तकौमुद्यामुत्तरार्धे तिङन्तकाण्डः ।

Four leaves added at the beginning contain the following :

சுக்ல வருஷம் அர்ப்பிசி மீ சுக்ல சதுர்த்தி சின்னப்பெண்பிள்ளை ஜாதகம். நக்ஷத்ரம் கேட்டை . . . . . பாதம். நக்ஷத்ரம் விசாகம் நாலாம்பாதம். ஸர்வஜித் வருஷம் ஆடி மீ சுக்லாஷ்டமி.

श्रुत्वा यस्याट्टहासध्वनिमुषितवतः कन्दरान्तः प्रकामं
दानाम्भःसिक्तगण्डाः करटिविततयो दिक्ष्वधावन्भयार्ताः।
सोऽयं संप्राप्य सत्त्वक्षयमतिजरसा खिन्नगात्रो मृगेन्द्रो
जम्बूकानां सकाशाद्व्रजति परिभवं स्वल्पसत्त्वादिदानीम्॥
मज्जद्गीर्वाणकान्ताजनकुचकलशाभोगकाश्मीरवास-
स्यानाम्भःस्वर्गगङ्गाकनकमयसरोजालिकेलीरसज्ञः ।
हंसो हा हन्त कोष्णाम्भसि बकनिवहैः पल्वलेऽस्मिन्निवासं
नीतो दैवेन तेषां स गरुदभिहतिं सासहीति प्रकामम् ॥
स्वयूथादायातः सह वसति काकः पिककुलै-
रभिन्नश्चूतद्रौ निभृतमिह हा हन्त वसतु ।
वसन्ते संप्राप्ते मधुरगिरमेषु प्रचुरमु-
द्गृणत्स्वेषां मध्ये किमिह काकः कलयतु ॥ ३ ॥
मल्लीं वल्लीमतल्लीं सुचिरपरिचितामप्यपेतप्रसूने-
त्युत्सृज्यान्यत्र याति भ्रमर ननु भवान् याहि याहि त्वमद्य ।
अद्य श्वो वा परश्वः कतिपयदिवसैर्वा यथापूर्वमेषा
पुष्पैर्भ्राजिष्यतेऽस्याः सविधभुवि तदायास्यसि त्वं कथं वा॥

228. 25. M. 1.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 242 Foll. 15 × $1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains up to the end of Uttarakṛt-prakaraṇa.

229. 26. H. 29.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 66 Foll. $15\frac{1}{2}$ × $1\frac{1}{4}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Vaidika and Svara prakriyas.

230. 29. B. 2.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 18 Foll. $16\frac{1}{2}$ × 1 inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Wants beginning in the Samāsaprakaraṇa and breaks off in the Taddhitaprakaraṇa.

231. 29. F. 13.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 12 Foll. $13\frac{1}{2}$ × $1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Good. Good writing.

Contains the Sandhiprakaraṇa only.

232. 29. J. 28.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 15 Foll. 15½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Contains the Tiṅantaprakaraṇa breaking off in the Divādi.

233. 29. K. 6.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 52 Foll. 16½ × 1 inches. 6 lines in a page. Telugu script. Old Slightly injured. Good writing.

Contains up to the end of S'abdādhikāra.

234. 29. L. 25.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 93 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Clumsy writing.

Breaks off in the Samāsaprakaraṇa.

The former owner of the MS.—Vāvila Veṅkaṭāvadhāni.

235. 29. M. 7.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 38 Foll. 17 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Svaraprakriyā.

The former owner of the MS.—Vāvila Veṅkaṭāvadhāni.

236. 30. H. 34.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 86 Foll. 13½ × 1⅛ inches. 8 lines in a page. Grantha script. Old. Slightly Injured. Good writing.

Contains the Kṛt and Vaidika prakaraṇas.

237. 30. J. 15.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 85 Foll. 16½ × 1 inches. 5 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Wants the beginning in Samāsaprakaraṇa and goes on up to the end of Pūrvārdha.

The former owner of the MS.—Vāvila Veṅkaṭāvadhāni.

238. 30. J. 20.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 65 Foll. 16½ × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Kṛt and Vaidika prakaraṇas.

239. 30. L. 23.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Palm-leaf. 38 Foll. 15½ × 1¼ inches. 5 lines in a page. Telugu script. Old. Injured. Clear writing.

Wants beginning in the Sandhiprakaraṇa and breaks off in the S'abdādhikāra.

240. 35. C. 149.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 102 Foll. 6½ × 4 inches. 11 lines in a page. Devanāgarī script. Good. Good writing.

Contains the Vaidika and Svara prakaraṇas with slightly different readings.

241. 41. B. 29.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 67 Foll. 10 × 4½ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Uttarārdha from Divādi to Lakārārthaprakriyā.

Date of copying: Saṁ. 1704. Sarvajit year.

Name of the scribe. Gaṇes'a son of Das'aputra Viṭṭhala.

The last leaf contains the following stanzas:

यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते ।
तेनैव यदि चेत् क्लीबं तदुक्तपुंस्कमुच्यते ॥
लिङ्गसंख्याविभेदेऽपि चोपमानोपमेयता ।
विभक्तिः पुनरेकैव चोपमानोपमेयता ॥

Three extra leaves at the end contain a few lines of the Siddhāntakaumudī copied again.

242. 19. F. 33.

सिद्धान्तकौमुदीसंग्रहः—अज्ञातकर्तृकः

Palm-leaf. 37 Foll. 14 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is an abridgement of the Siddhāntakaumudī of Bhaṭṭojidikṣita. The author whose name is not known, retains those passages of the Siddhāntakaumudī which give the mere meaning of the Sūtras and omits those which give illustrations and enter into controversial discussions. Thus he makes the work as simple as possible for beginners.

Breaks off in the Tadditaprakaraṇa.

Beginning:

हलन्त्यम् । हलिति सूत्रे अन्त्यमित् स्यात् । आदिरन्त्येन सहेता । अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । हलन्त्यम् । उपदेशेऽन्त्यं हलित्स्यात् । उपदेशेऽजनुनासिक इत् । उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । ऊकालोऽज्झस्वदीर्घप्लुतः । उश्च ऊश्च ऊश्च(प्लु) वः । वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । उच्चैरुदात्तः । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । नीचैरनुदात्तः ।

End:

नडादिभ्यः फक् । गोत्रे । हरितादिभ्योऽञः । एभ्योऽञन्तेभ्यो यूनि फक् । यञिञोश्च । गोत्रे यौ यञिञौ तदन्तात् यूनि फक् स्यात् ।

Three extra leaves are added at the end. The first leaf reads the first 7 stanzas from the Ratnatrayaparīkṣā of Appayadīkṣita. The second leaf (*a*) reads:

अशांभवाश्च चोराश्च पुल्कसाश्च समाः स्मृताः ।
ततो न ते दानपात्रमपात्रमिति निश्चयः ॥
अशांभवाय दत्तानि मेरुतुल्यधनान्यपि ।
व्यर्थानि तानि सर्वाणि चोरनीतसमानि हि ॥
शैवैः शाक्तैर्वैष्णवैश्च सौरैर्गाणपतैरपि ।
दृष्टं स्पृष्टं हविष्यादि स्मार्तहोमे न युज्यते ॥
शैववैष्णवशाक्तेभ्यः सौरगाणपताय च ।
न दद्यात्स्मार्तकर्मादौ दत्तं चेन्निष्फलं भवेत् ॥

शैववैष्णवशाक्तैश्च सौरगाणपतैरपि ।
न कुर्यात्सह भुक्ति च भुक्तं चेत्पलैः समम् ॥
लिङ्गस्य धारणाच्चैव शैवानां दोषसंभवः ।
चक्राङ्कनाद्वैष्णवानां शाक्तानां मद्यपानतः ॥
कापालिकानां रक्तस्य सौराणां मांसभक्षणात् ।
उच्छिष्टाद्गणभक्तानां न युक्तं स्मार्तकर्म च ॥
शैववैष्णवशाक्ताश्च सौरगाणपता अपि ।
कापालिकाश्च संन्यासे तत्रानर्हा . . स्तथा ॥
इति यतिधर्मप्रकाशिकावचनम् ॥

The second leaf (*b*) contains an index of some sūtras of the Aṣṭādhyāyi.

The third leaf (*a*) reads :

ஆரபி: *கலிதரனைத்தரிசிக்கக் கண்களா யிரம் வேணுமே.*

பிலஹரி: मायागोपकिशोर हरे माययाखिलस्मय माम् ।

மோஹநம்: *கருணைசெய்வாரென்று தாமஸமா க்ருஷ்ண கழலிணைகை தொழுது.*

ஸ்ரீராகம்: *ஸாமி நீ தய உத்ஸா மநமே.*

நீல்காம்போதி:—ஸாவேரி: *ஞு தாநநுஜ பஞ்சவர்ணக்கிளியே, பாக்யமல்லவே, கவரழகுழ திருநெல்லைக் காந்திமதித்தாயே மானிட வடிவெடுத்து, மனத்துடன் பொய் தாமரையும்.*

The third leaf (*b*) contains a list of MSS. probably owned by the owner of this MS.

243. 33. J. 7.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 264 Foll. 16 × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary written by Bhaṭṭoji on his Siddhāntakaumudī. The Prakriyākaumudī of Rāmacandra and commentaries thereon are often criticized. The author invariably follows Kaiyaṭa, Mādhava and Haradatta. He gives good credit to Kās'ikāvṛtti of Jayāditya-Vāmana. But whenever he finds therein deviation from Patañjali, quotes Kās'ikāvṛtti by name. The name Prauḍhamanoramā attached to the commentary is significant in meaning that the work is capable of pleasing the learned readers. (*Vide* S'abdaratna—प्रौढानां मनो रमयतीति.) Dr. S. K. Belvalkar writes that Bhaṭṭoji is also the author of another work Bālamanoramā (*Vide*—" Bhaṭṭoji himself wrote a commentary on his Siddhāntakaumudī called Prauḍhamanoramā to distinguish it from an abridgement of the same called Bālamanoramā also by the same author." Page 47. Systems of Sanskrit Grammar). This statement seems to have been based on mere conjecture which is not only unfounded and superfluous but also misleading.

Breaks off in the Dvirukiprakaraṇa of Pūrvārdha.

Beginning :

ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः ।
सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम् ॥

हयवरट् । होपदेशः अट्अश्हश्इण्ग्रहणेषु हकारग्रहणार्थः । अर्हेण; अड्व्यवायेऽपीति णत्वम् । देवा हसन्ति; भोभगो इति यत्वम् । देवो हसति; हशि चेत्युत्वम् । लिलिहिढ्वे लिलिहिध्वे; विभाषेटः इति

वा ढः । हल् । इदं सूत्रं वलृल्झलृशल्षु हस्य ग्रहणार्थम् । रुदिहि स्वपिहि; रुदादिभ्य इति वलादिलक्षण इट् । स्नुहित्वा स्नोहित्वा; रलो व्युपधादिति वा कित्वम् । अदाग्धाम्; झलो झलीति सलोपः । अलिक्षत्; शल इगुपधादिति क्सः ।

End:

सुपः सुर्वक्तव्य इति । अत्र केचित्—द्वितीयादीनामेवेदं स्वादेशविधानम् । अत एवोत्तरदलेऽपि द्वितीयादय एव, न तु प्रथमा । तत्राप्येकवचनमेव, न तु वचनान्तरम् । एतच्च दुर्गपरिशिष्टकण्ठाभरणाद्यर्वाचीनग्रन्थेषु स्पष्टम् । तदुक्तं प्राचा—द्वितीयैकवचनान्तत्वं परपदस्येति । एतच्च सर्वमपाणिनीयम्, भाष्यादावनुक्तत्वात् । तदेतत् ध्वनयन् वच.

244. 10. C. 35.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 93 Foll. 10 × 4¼ inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains up to the end of Lakārārthaprakriyā.

Beginning:

ग्रन्थमध्ये कृतं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति—श्रौत्रेति । हायनान्तयुवादिभ्योऽणिति सूत्रे श्रोत्रियस्य यलोपश्चेति वार्तिकात् श्रौत्रं श्रोत्रियत्वम् । आर्हन्ती योग्यता, गुणवचनब्राह्मणादिभ्यः कर्मणि चेति सूत्रे अर्हतो नुम् चेत्युक्तेः । ताभ्यां वित्तैः । किंच गुण्यैः गुणवद्भिः । रूपादाहतप्रशंसयोर्यबिति सूत्रे अन्येभ्योऽपि दृश्यते इत्युक्त्वा गुण्या ब्राह्मणा इत्यस्य भाष्यदावुदाहृतत्वात् । तोष्टूय्यमान इति । स्तौतेर्यङन्तात्कर्मणि शानच् । अपिशब्देनापाततो विरोधं ध्वनयति । वस्तुतस्तु न विरोधः, स्तुतिप्रयोजकीभूतानामनन्तकल्याणगुणानां श्रुतिसिद्धत्वेऽपि वियदादिवत् व्यावहारिकत्वात्तदभावस्य पारमार्थिकत्वात् । एतच्चोत्तरमीमांसायां निरूढमेव ।

End:

भ्रम एवेति । पुरुषांशे वचनांशे चेति भावः । एवं च पुरीमवस्कन्देत्यादौ तिङन्तत्वं यथायथं परस्मैपदात्मनेपदान्तत्वं च सिद्धान्ते स्थितम् । पुरुषवचनसंज्ञे तु न स्त एवेति सर्वेष्टसिद्धिः ।

Colophon:

इति लकारार्थप्रक्रिया ।

इति भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां प्रौढमनोरमायां तिङन्तकाण्डं समाप्तिमगमत् ॥

The former owner of the MS.: भट्ट आधारस्येदं पुस्तकम् ।

245. 10. E. 68.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 28 Foll. 10 × 4 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

The leaf bearing the serial No. 21 is missing.

Contains the Vaidika and Svara prakriyās complete.

The date of copying and the name of the scribe:

संवत् १८९६ वर्षे कार्तिकमासे कृष्णपक्षे षष्ठ्यां सोमवासरे देहावलीस्थभट्टोपनामकदेवभट्टात्मजेन शिवशंकराख्येन लिखितेयं प्रौढमनोरमा ।

Beginning :

अथ वैदिकशब्देषु विशेषमाह—षष्ठीयुक्त इति। वृषन्निति। कनिन्युवृषीति कनिनन्तस्य वृषन्शब्दस्य भत्वमुपसंख्यायते। तत्फलं तु नलोपस्य णत्वनिषेधस्य चाभावः। लोके तु वृषवसुः वृषाश्वः। उभयसंज्ञानीति। अयस्मयादिषु ऋक्तेत्यादयः समुदाया एव बोध्याः। तेन जश्त्वमस्तु कुत्वं मा भूदिति वैपरीत्यं न प्रसज्यत इति बोध्यम्।

End :

एवं रत्नधातमम्। अलला भवन्तीत्यादीनां क्रमकाले इतिशब्दोत्तरभागे प्रचयो न प्रवर्तते।

परिग्रहे त्वनार्षान्तात्तेन चैकाक्षरीकृतात्।
परेषां न्यासमाचारं व्यालिस्तौ चेत्स्वरौ परौ॥

इति वचनात्। इत्थमन्यत्रापि मुनित्रयवचांसि तत्तत्प्रातिशाख्यानि तद्व्याख्यातृगिरो निरुक्तादिग्रन्थांश्च पर्यालोच्य तत्त्वं निर्णेयम्। तदाह—यथाशास्त्रमुन्नेयमिति।

अखण्डमपि यत्सर्वं कृत्तद्धितपरं परम्।
अशेषशास्त्रसंवेद्यमक्षरं तदुपास्महे॥
सिद्धान्तकौमुदीव्याख्या सेयं प्रौढमनोरमा।
भट्टोजिदीक्षितकृतिर्भूयाद्विश्वेशतुष्टये॥

Colophon :

इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन कृतायां प्रौढमनोरमायामुत्तार्धं समाप्तम्॥

Date of copying : Saṁ. 1856.

संवत् १८५६ वर्षे कार्तिकमासे कृष्णपक्षे षष्ठ्यां सोमवासरे देहावलीस्थभट्टोपनामकदेवभट्टात्मजेन शिवशंकराख्येन लिखितेयं प्रौढमनोरमा।

246. 9. D. 8.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 62 Foll. 9½ × 4¾ inches. 16 lines in a page. Telugu script. Old. Good. Good writing.

The MS. is divided into two parts. The first part contains 19 Foll. and the second 43 Foll. The first part contains the Tadditaprakaraṇa without the beginning and end, while the second part the same portion complete but wanting one leaf in the beginning.

247. 9. D. 9.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 27 Foll. 10½ × 4¾ inches. 14 lines in a page. Telugu script. Old. Good. Good writing.

Contains the Kṛtprakaraṇa complete.

Reads the following colophon :

इति श्रीवेदान्तप्रतिपादिताद्वैतसिद्धान्तस्थापनाचार्यलक्ष्मीधरपुत्रभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां प्रौढमनोरमायां कृदन्तप्रक्रिया समाप्ता॥

248. 9. G. 25.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 40 Foll. 12 × 5¼ inches. 10 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the Uttarārdha breaking off in the अदादिप्रकरण.

249. 9. G. 28.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 55 Foll. 12 × 4¾ inches. 14 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains up to the end of Samāsaprakaraṇa in Pūrvārdha.

250. 10. B. 27.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 151 Foll. 11½ × 4¾ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Begins in the course of Samāsaprakaraṇa and goes on up to the end of Pūrvārdha.

End :

मूलकृता पुंवद्भावस्यास्पृष्टत्वात् तद्ग्रन्थस्याज्ञस्येनैव व्याख्यातत्वाच्चेति दिक् । यथायथमिति । न लोकेति षष्ठीनिषेधः, ज्ञातेत्यस्य तृन्नन्तत्वात् ।

Colophon :

सिद्धान्तकौमुदीव्याख्या येयं प्रौढमनोरमा ।
समाप्तं तत्र पूर्वार्धं तेन तुष्यतु शंकरः ॥
इति पूर्वार्धम् ॥

The MS. contains also the Laghus'abdaratna for the portion mentioned above.

Then 13 leaves contain a fragment of the Uttarārdha of the Siddhāntakaumudī containing the Nāmadhātu and Ātmanepadaprakriyās.

Name of the scribe : Bhīmas'armā.

251. 10. D. 13.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 236 Foll. 11½ × 4½ inches. 10 lines in a page. Devanāgarī script Old. Good.. Good writing.

Contains the Uttarārdha up to the end of Kṛtprakaraṇa.

The MS. contains also the Laghus'abdaratna for this portion.

252. 10. E. 22.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 27 Foll. 12 × 5 inches. 10 lines in a page. Devanāgarī script. Old. Good. Clear writing.

Contains the Taddhita and Dvirukti prakriyās complete.

Date of copying : Saṁ. 1880. S'aka 1746. Tāraṇa year.

253. 10. E. 42.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 107 Foll. 9½ × 4½ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

Breaks off in the Kārakaprakaraṇa in the Pūrvārdha.

The former owner of the MS.—Mārtāṇḍacintāmaṇi.

254. 11. E. 34.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Paper. 109 Foll. 12 × $4\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Clear writing.

Breaks off in the S'abdādhikāra.

The MS. contains also the Laghus'abdaratna for this portion.

255. 19. D. 82.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 33 Foll. $12\frac{3}{4}$ × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Begins in Tatpuruṣasamāsaprakaraṇa and breaks off in the Taddhitaprakaraṇa.

Five extra leaves are added at the end. The first leaf contains passages relating to Sāmagāna. The remaining leaves contain a small portion of the S'abdakaustubha of the वृद्धयाह्निक.

256. 21. G. 21.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 70 Foll. $14\frac{1}{2}$ × $1\frac{1}{4}$ inches. 5 lines in a page. Telugu script. Old. Injured. Legible writing

Begins in the course of the Uttarakṛt and breaks off in the S'varaprakaraṇa.

257. 24. B. 4.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 25 Foll. 18 × $1\frac{3}{4}$ inches. 11 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the S'abdādhikāra.

258. 24. B. 20.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 97 Foll. $6\frac{3}{4}$ × $1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Contains the Vaidika and Svaraprakaraṇas.

The former owner of the MS.—Balarāma S'āstri.

259. 26. N. 23.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 139 Foll. $12\frac{1}{2}$ × $1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains up to the end of the Samāsaprakaraṇa.

260. 26. O. 9.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 113 Foll. $12\frac{1}{8}$ × $1\frac{3}{4}$ inches.

14 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Foll. bearing Nos. 85 to 138 are missing.

Contains the Pūrvārdha with a gap in the middle due to missing of the Foll. 85 to 138 as said above.

261. 27. N. 34.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 47 Foll. 12¼ × 1⅞ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the 4th pāda of the Uṇādi and goes on up to the end of Svaraprakriyā.

The Scribe adds at the end :

" स्वार्थं परार्थं लिखिता मनोरमा
सदाजवेनात्तसदाशिवेन ।
हृदञ्जने ध्यातमहाशिवेन
संसेवया हर्षसदाशिवेन ॥
आद्यन्तयोः प्रतीकस्य गैरिकाचूर्णलेपनम् ।
मनोरमायां पद्यस्य यथेच्छं वार्तिकस्य च ॥
इतिः पद्यवार्तिकसमुच्चयार्थकः । "

Date of copying : Kaṭaka month in Krodhana year.

262. 28. J. 36.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 104 Foll. 17½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains up to the end of Avyayaprakaraṇa in Pūrvārdha.

263. 28. J. 37.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 128 Foll. 13½ × 1⅛ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Aluksamāsaprakaraṇa in the Pūrvārdha.

Four extra leaves are found at the end.

Leaves 1 and 2 contain a few verses from the III kāṇḍa of the Vākyapadīya. Leaves 3 and 4 contain the following stanzas :

" अहिर्भूषा भक्ष्यं गरलमपि चोन्मत्तकुसुमं
श्रवोभूषा वासः ककुबपि पिशाचाः सहचराः ।
जटी भिक्षुर्यश्चाखिलभुवनभाग्यप्रदवरः
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥
भो भोजराज त्वदरातिवेश्मभित्त्यश्मपातेन विताडितान्ताः
भेरी व्यकूजद् बृहती विशाला ढंढं ढढं ढं ढढढं ढढं ढं ॥
दृष्ट्वा मञ्जुलकुड्मलानि विलसन्मल्लीलतातल्लजे
सस्नेहादरसंभ्रमं प्रतिदिनं संश्रित्य तस्यान्तिकम् ।
* * * * * * *
काले बहौ गतवति व्यथमानचेता
दैवं विचिन्त्य बहु शोचति चञ्चरीकः ॥
कौसल्याकमनीयगर्भजलधौ मारीचनीचाम्बुदे
सीतामानससारसे च सततं बृन्दे मुनीन्द्रद्विषाम् ।
सुग्रीवाग्रजघोररावणगजायोध्यारमासु प्रभुः
पायात्त्वां सुरराज यो हरिरिव श्रीमान् रघूणां पतिः ॥
अन्यत्र भीष्माद् गाङ्गेयादन्यत्र च हनूमतः ।
हरिणीखुरमात्रेण चर्मणा मोहितं जगत् ॥

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥"

Then the last page reads the following explanations on some of the technical terms used in Sanskrit Grammar.

'नित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं परिनिष्ठितत्वम् ।
निमित्तवत्पदभिन्नपदावृत्तित्वमेकपदस्थत्वम् ॥'

264. 28. J. 41.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 100 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the Uttarārdha up to the end of Lakārārthaprakriyā.

265. 28. J. 44.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 18 Foll. 11½ × 1¾ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Sandhiprakaraṇa.

Three extra leaves added in the beginning contain a small portion of the अदादि of the Siddhāntakaumudī.

266. 28. J. 45.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 73 Foll. 14½ × 1⅓ inches. 8 lines in a page. Telugu script. Old. Injured. Legible writing.

Breaks off in the Strīpratyayaprakaraṇa.

267. 28. N. 23.

सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमा—भट्टोजिदीक्षितकृता

Palm-leaf. 166 Foll. 16 × 1¼ inches. 9 lines in a page. Grantha script. Old. Much injured. Illegible writing. Bamboo boards are added to both sides.

Contains the Uttarārdha complete.

268. 11. C. 6.

प्रौढमनोरमाव्याख्यानम् , लघुशब्दरत्नम्—हरिदीक्षितकृतम्

Paper. 110 Foll. 11¾ × 5 inches. 13 lines in a page. Devanāgarī Script. Old. Good. Good writing.

This is a commentary on Bhaṭṭojidīkṣita's Prauḍhamanoramā by Haridīkṣita son of Vīres'vara *alias* Bhānujī also called Rāmās'rama. This Vīres'vara was the son of Bhaṭṭojidīkṣita the author of Siddhāntakaumudī. Bhaṭṭoji belongs to the old school of grammarians while Haridīkṣita represents the new school. The combination of these two authors belonging to two different schools of thought —grandfather and grandson one being the author of the text and the other of the commentary—is note-worthy. In the commentary Haridīkṣita tries to maintain the text as far as possible explaining it in accordance with the principles accepted

by the new school. But whenever he finds it impossible to do so, he expresses his own views by the words beginning with परे तु.

Contains up to the end of Samāsās'rayavidhi and a few lines in the beginning of the Taddhitaprakaraṇa.

Beginning :

शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥

ध्यायमिति । ध्यात्वा ध्यात्वेत्यर्थः । णमुलन्तमेतत् । परम्; सर्वजगदुपादानम् । कार्यब्रह्महिरण्यगर्भव्यावृत्तय इदम् । ध्यानं चिन्तापरपर्यायं स्मृत्यनुकूलव्यापाररूपम् । स्मरणं तु तज्जन्यमिति विशेषः । गुरोरित्येकवचनेन सर्वविद्यालाभ एकस्मादेव गुरोरिति सूचितम् । प्रौढानां मनो रमयतीत्यर्थिकां मनोरमाम् । प्रौढत्वं सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम् । इणग्रहणेष्विति ।

Colophon :

इति दीक्षितभट्टोजिपौत्रदीक्षितहरिकृते लघुशब्दरत्ने मनोरमाव्याख्याने पञ्चसंधिप्रकरणम् ।

End :

दितिशब्दादिति । क्तिजन्तादिति शेषः । एवम् अदितेरपि । ङीषि कृते इति । क्तिजन्ताभ्यामिति शेषः । न पदान्तेति । पूर्वत्रासिद्धे नेति निषेधोऽप्यत्र बोध्यः । निर्वाह्य इति । व्यञः षित्वेऽप्यजादिपाठादिति भावः । स्त्रीत्वं तु लिङ्गमशिष्यं लोकाश्रयत्वादिति न्यायेन बोध्यम् । वस्तुतस्तु एषोऽपि प्रागुपपादितहरदत्तादिरीत्या प्रमाद एवेति तत्त्वम् । याम्याः शंसन्तीति वैदिकप्रयोगनिर्वा . . . ।

269. 10. B. 27.

प्रौढमनोरमाव्याख्यानम्, लघुशब्दरत्नम—हरिदीक्षितकृतम्

Paper. 151 Foll. $11\frac{1}{2} \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Goodwriting.

The author mentions herein his other work S'abdaratna apparently Bṛhacchabdaratna and Nāges'a's S'abdendus'ekhara and Mañjūṣā.

Wants the beginning in the Samāsaprakaraṇa and goes on up to the end of Pūrvārdha.

End :

अस्पृष्टत्वादिति । पुंवद्रूपमिति हि तेनोक्तमिति भावः । आञस्येनेनि । अत्र केचिदित्यादिना मदुक्तया मूलस्थरीत्येति भावः । विस्तरस्त्वस्मत्कृते शब्दरत्ने मदन्तेवासिकृतशब्देन्दुशेखरमञ्जूषयोश्च द्रष्टव्यः ।

Colophon :

इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितहरिविरचिते प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने सुबन्तं समाप्तिमगमत् ॥

The MS. contains also the text of Prauḍhamanoramā for this portion.

Name of the scribe—Bhīmas'armā.

270. 9. D. 31.

प्रौढमनोरमाव्याख्यानम्, लघुशब्दरत्नम्—हरिदीक्षितकृतम्

Paper. 160 Foll. $10 \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

The colophon clearly shows that Haridīkṣita was the son of Vires'vara son of

Bhaṭṭojidīkṣita. This Vires'vara was also called Bhānujī and Rāmās'rama.

Contains from the Samāsās'rayavidhi to to the end of Vaidikaprakaraṇa.

End:

कथं संगच्छत इति। एवं च ते चिन्त्या इति भावः। चिन्त्यमिति। चिन्ताबीजं तु हश्च व्रीहिकालयोरित्यत्र सामान्यग्रहणार्थं कित्त्वमिति। प्राचीनग्रन्थैरिति। दीर्घोऽकित इति सूत्रस्थभाष्यादिग्रन्थैरित्यर्थः। व्यवस्थिततयेति। छन्दसि सर्वविधीनां वैकल्पिकत्वादिति भावः। विकल्पव्यवस्थयेति। व्यवस्थितविकल्पेनेति यावत्। इत्यष्टमः।

Colophon:

इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितवीरेश्वरपुत्रदीक्षितहरिविरचिते लघुशब्दरत्ने वैदिकी समाप्ता॥

271. 10. D. 13.

प्रौढमनोरमाव्याख्यानम्, लघुशब्दरत्नम्—हरिदीक्षितकृतम्

Paper. 236 Foll. 11½ × 4½ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged into 2 groups. The 1st group contains 151 Foll. and the 2nd 85 foll.

Contains the Uttarārdha up to the end of Kṛtprakaraṇa.

Beginning:

ग्रन्थमध्ये कृतमिति। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणीत्यादिभाष्योक्तफलोद्देशेनेत्यर्थः। ताभ्यां वित्तैरिति। तेन वित्त इति चणप्। वेदाध्ययनकर्तृत्वेन तदुक्तानुष्ठानकर्तृत्वेन च प्रसिद्धैरित्यर्थः। श्रुतिसिद्धत्वेऽपीति। एष आत्मापहतपाप्येत्यादिश्रुतिसिद्धत्वेऽपीत्यर्थः। परमार्थिकत्वादिति। नेह नानास्ति किंचनेति श्रुतेरिति भावः। निरूढं प्रसिद्धम्।

End:

This is a commentary on Bhaṭṭojidīkṣita's Siddhāntakaumudī. The commentary is called Vilāsa. The manuscript is a fragment and does not contain any colophon supplying the names of the author and the commentary. However, on comparison of a portion of this commentary with the corresponding portion of the commentary described under D. No. 1448 of the Des. Cat. of the Govt. Oriental MSS. Library, Madras, both the commentaries are found identical and the author is known to be Lakṣmīnṛsiṁha, son of Koṇḍubhaṭṭamahopādhyāya of the Mahīdara family and pupil of Nārāyaṇendra. Again on further comparison with the commentary described under D. No. 1446 of the Des. Cat. of the same Library and with that described under No. 562 of the Des. Cat. of the Curator's office, Trivandrum, the name of the commentary is known as Vilāsa. From the colophon and the introductory stanzas of the commentary as quoted in the above-mentioned Catalogues it is also known that the author Lakṣmīnṛsiṁha was the son of Rāmāmbā and pupil of Rāmabhadra who is extold as an incarnation of the famous Patañjali. This Rāmabhadra may be probably same as the famous Rāmabhadradīkṣita. It is also known from the above-mentioned references that Rāmāmbā was the author's mother. This author Lakṣmīnṛsimha is identical with the authors of Tarakadīpikā and Ābhoga, the commentary on Amalānanda's Kalpataru.

It is an accepted fact that Koṇḍubhaṭṭa, the author of Vaiyākaraṇabhūṣaṇa and Sāra thereof, was the nephew of Bhaṭṭojidīkṣita. If our author's father Koṇḍubhaṭṭa is taken identical with Bhaṭṭoji's nephew, as stated in No. 6271 and 7090 of the Tanjore. Des. catalogue, the work may be assigned to the 17th Century A.D. But evidences for such identification are needed.

The leaves bearing numbers 47—49 52—55 and 57—61 are missing.

Contains from the S'abdādhikāra to the Samāsās'rayavidhi (incomplete).

Beginning:

उपजीव्यसंधिनिरूपणानन्तरं शब्दान्निरूपयितुकामः शिष्यबुद्धिसौकर्यायादौ सुबन्तान्निरूपयितुमाह—अर्थवदिति। प्रत्ययं प्रत्ययान्तं चेति। प्रत्यय इति प्रत्ययग्रहणेन तदन्तस्य ग्रहणे प्रत्ययान्तस्यैव व्यपदेशिवद्भावेन प्रत्ययस्यापि ग्रहणमिति भावः। न च

संज्ञाविधित्वान्न तदन्तग्रहणम्, सुप्तिङन्तं पदमित्यन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनादिति वाच्यम्; अप्रत्यय इति प्रतिषेधविधिरिति कैयटादौ स्थितत्वात्। एवं च वर्जयित्वेति फलितार्थकथनमिति बोध्यम्। अर्थवदिति नपुंसकत्वानुगुणं विशेष्यमाह—शब्दस्वरूपमिति। वनं धनमित्यादौ वन् धन् इत्यंशस्य प्रातिपदिकत्वे ततः परस्य सोरेकवचनमुत्सर्गतः करिष्यत इति भाष्यकारवचनप्राप्तस्य हल्ङ्यादिलोपे सति न लोपो मा भूदित्यर्थवदित्युक्तम्। वृत्रमहन् काण्डे कुण्डे इत्यादौ नलोपह्रस्वादिव्युदासार्थमधातुरित्यादिकमिति बोध्यम्। कृत्तद्धितान्ता इति। इहानुवृत्तस्यार्थवत्पदस्य प्राशस्त्येनार्थवत्परत्वात् कृत्तद्धितान्तयोरेव च पर्यवसिताभिधेयत्वेन तथात्वादर्थवत्पदम ...... ग्रहणमिति भावः।

End:

तदाह—क्विबन्तेष्विति। उपानदिति। उप नह्यत इति विग्रहे संपदादित्वात्कर्मणि क्विपि नहो धः इति धत्वे दीर्घे च रूपम्। नीवृदादौ कर्तरि क्विप् निवर्तत इति नीवृत्। प्रवर्षतीति प्रावृट्। मर्माणि विध्यतीति विग्रहे व्यधेः ग्रहिज्येत्यादिना संप्रसारणे मर्मावित्। नितरां रोचत इति नीरुक्। तस्यैवोदाहरणान्तरं केषुचित्कोशेषु दृश्यते अभीरुगिति। अभितो रोचत इत्यर्थः। ऋतिं सहत इति विग्रहे पूर्वपदादिति षत्वे ऋतीषट्। परितनोतीति परीतत्। गमः क्वावित्यत्र गमादीनामिति वचनात्तनोतेरप्यनुनासिकलोपे तुकि रूपम्। गतिकारकयोरेवेति। दीर्घ इत्यर्थः। पटुरुगिति। पट्वी रुग्यस्येति बहुव्रीहिः। रुक् च कान्तिः। वनगिर्योरिति। आदिशब्दस्य प्रत्येक संबन्धः, वनगिर्योरित्यनेन यथा।

354. 9. E. 60.

सिद्धान्तकौमुदीव्याख्या सुमनोरमा—तिरुमलयज्वकृता

Paper. 119 Foll. 11¾ × 4 inches. 14 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a commentary on the Siddhānta-Kaumudī of Bhaṭṭojidīkṣita. The commentary is called Sumanoramā. The author Tirumalayajvan was the son of Veṅkaṭa-yajvan belonging to the family known as Ṣaḍdars'ana. The title Ṣaḍdars'ana of the family is said to have sprung from a guru called Upendra-Sarasvatī. The author Tirumalayajvan had two brothers namely Sarves'varayajvan and Abbaṇṇayajvan of whom the former was his preceptor. This Sarves'varayajvan is identical with the author of Mahābhāṣyapradīpasphūrti (described under No. 107 herein before) as our author quotes herein the work under the auhorship of his preceptor (Vide—अधिकं त्वस्मद्गुरुकृतभाष्यप्रदीपस्फूर्तौ द्रष्टव्यम्.)

Contains the Uttarārdha up to the end of Curādiprakaraṇa.

Beginning:

यद्वक्त्राभिमुखं मखेषु मखिभिर्मन्त्रानुपूर्वं हवि-
र्दत्तं दैत्यवराभिपात्य विबुधाः सर्वे सदा भुञ्जते।
यद्ध्यानात्प्रभवन्ति निर्मलधियः के वा महापातका
...... तमग्निपुरुषं वन्दामहे मानसे॥
वन्दे देव्याः सरस्वत्या वन्दनीये पदाम्बुजे।
यद्वन्दनेन मन्दोऽपि विन्देद् गुरुसमानताम्॥
यो वेदगर्भमतनोद्द्विधिमात्मसृष्टं
य: पञ्चवर्षमकरोद्ध्रुवमाप्तवाचम्।

सोऽयं समस्तजगतां सुहृदन्तरात्मा
वाचः प्रसारयतु मे बुधसंमतार्थाः ॥
अष्टाध्यायीं दर्शयन्तीव साक्षा-
द्व्याख्यामुद्रा राजते यस्य हस्ते ।
भूयो भूयस्तारकान् शेषयन्ती
साक्षादीक्षे दक्षिणामूर्तिदेवम् ॥
वृद्धोपेन्द्रयतीन्द्रसान्द्रकरुणासंवृद्धषड्दर्शन-
श्रीषड्दर्शनवेङ्कटाध्वरिलसद्गर्भाब्धिचन्द्रोदयम् ।
सौजन्यार्चितसर्वलोकविनुतप्रख्यातकीर्तिश्रियं
श्रीसर्वेश्वरसर्वतोमुखगुरुं सर्वेश्वरांशं भजे ॥
श्रीषड्दर्शनवेङ्कटाध्वरिसुतः षड्दर्शिनीवल्लभ-
श्रीसर्वेश्वरसर्वतोमुखगुरोर्विद्यानिधेः सोदरः ।
विख्याताब्वनपौण्डरीकसहजः सिद्धान्तकौमुद्यनु-
व्याख्यामातनुते सुधीस्तिरुमलः श्रीद्वादशाहाध्वरी ॥

स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—श्रौत्रेति । श्रोत्रियस्य भावः श्रौत्रम् । हायनान्तयुवादिभ्योऽण् इति सूत्रे पठितात् श्रोत्रियस्य यलोपश्चेति वार्तिकात् अण्यलोपौ । यस्येति चेति इकारलोपः । अर्हतो भावः आर्हन्ती । वर्णदृढादिभ्यः ष्यञ्च इत्यत्र अर्हतो नुम् चेति वार्तिकात् ष्यञ्नुमौ । षित्वात् ङीषि हलस्तद्धितस्येति यलोपः । ताभ्यां वित्ताः श्रौत्रार्हन्तीचणाः । तेन वित्त इति सूत्रेण चणप्प्रत्ययः ॥

End :

पुच्छादिष्विति । सूत्रप्रत्याख्याने आत्मनेपदं न स्यादित्यत आह—णिजन्तादिति । बहुलवचनात् । बहुलमेतन्निदर्शनमित्यत्र । ग्रन्थान्ते धातुपाठान्ते ।

Colophon :

इति चुरादिणिज्विकरणः ॥

355. 25. C. 25.

सिद्धान्तकौमुदीव्याख्या सुमनोरमा—तिरुमलयज्वकृता

Palm-leaf. 81 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

The stanza which is given below says that the author's father Veṅkateśa was the son of Sarasvatīmakhin of the Ṣaḍdarśana family.

Wants beginning in the Strīpratyaya and breaks off in the Samāsaprakaraṇa.

As the first three leaves are much broken the beginning is given from the 4th leaf.

Beginning :

अयज्ञसंयोगार्थमारम्भः । पूर्वेण सहितः सपूर्व इति । समासे विद्यमानपूर्वस्येत्यभिप्रेत्याह । . . . विशेषणाल्लभ्यते । गृहस्य पतिरिति विग्रहः । अत्र पतिशब्दः स्वामिपर्यायः । अनुपसर्जनाधिकारात् दृढपत्नीत्यादौ न . . नित्यं सपत्न्यादिष्वेतदर्थम् । अन्यथा विकल्पाप्राप्त्या तदपवादस्य तत्सूत्रस्यायोगादित्यर्थः । बहुव्रीहावपीत्युपलक्षणम् । पति . . . संयोगाभावादित्यर्थः । उपमानादिति । अग्निसाक्षिकपाणिग्रहणसाधर्म्यादिति भावः । आचारेति । पत्नीवाचरतीत्यर्थे.

Colophon :

वृद्धोपेन्द्रसरस्वतीगुरुकृपासंवृद्धषड्दर्शनी-
वंशाब्धीन्दुसरस्वतीमखिसुतश्रीवेंकटेज्यावतः ।
सूनोस्तिर्मलयज्ववर्यविदुषः सिद्धान्तकौमुद्यनु-
व्याख्यायां सुमनोरमाभिधकृतौ स्त्रीप्रत्यया व्याकृताः ॥

End :

दिवो द्यावा । दिव्शब्दस्य द्यावादेश इत्यर्थः । . . .

कस्येत्यत आह—दिव इत्येवेति । ननु दिवसादेशे अकारो व्यर्थः, प्रयोगे अश्रवणादित्यत आह—आदेश इति । अकाराभावे पदान्तत्वात् . . . यादेशावित्यत आह—छन्दसीति । नन्वकारोच्चारणस्य रुत्वबाधनार्थत्वे दिवस्पृथिव्योरित्यत्र पदकाराः कथं विसर्गं कुर्वन्तीत्यत आह.

356. 9. G. 38.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 109 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

This also is a commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The commentary is called Siddhāntaratnākara. The author Rāmakṛṣṇabhaṭṭa was the son of Tirumalabhaṭṭa and grandson of Veṅkaṭādribhaṭṭa. It is interesting to note that the names of Rāmakṛṣṇa's father and grandfather *viz.*, Tirumala and Veṅkaṭa coincide with those of the author of Sumanoramā (vide the last number) and his father. But as the surnames—Bhaṭṭa in one side and Yajvan in other side—are different, we could not venture to identify them.

Beginning:

विश्वेशं सच्चिदानन्दं लक्ष्मीकान्तमजं विभुम् ।
प्रणम्याथ मुनीन्नत्वा पाणिन्यादींस्तथा गुरुम् ॥
वेदशास्त्रार्थनिष्णातं तातं तिरुमलाभिधम् ।
शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम् ॥
व्याचिख्यासुर्विधास्येऽहं रामकृष्णो यथागमम् ।
वैयाकरणसिद्धान्तरत्नाकरमिमं सुधीः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिमभीप्सुर्मङ्गलं मुख्यगुरुनमस्काररूपमातन्वानः शिष्यशिक्षार्थं ग्रन्थत उपनिबध्नाति—मुनित्रयमिति । त्रयोऽवयवा यस्येत्यर्थे संख्याया अवयवे तयबिति तयपि द्वित्रिभ्यां तयस्याय-ज्वेत्ययजादेशे षष्ठीसमासः । कृधातूपस्थाप्यक्रिया-निरूपितकर्मत्वात् कर्मणि द्वितीया । न च नमः-स्वस्तीत्यादिना नमःशब्दयोगे चतुर्थी शङ्क्या, उपपदविभक्तेः कारकविभक्तिर्बलीयसीति कारकविभक्ते-र्न्याय्यत्वात् । न च कर्तृकर्मणोरिति षष्ठी स्यादिति वाच्यम्, न लोकेति निषेधात् । नमस्कुर्मो नृसिंहायेत्यादौ तु तादर्थ्यरूपसंबन्धविवक्षया चतुर्थी । यद्वा क्रियार्थोपपदस्य कर्मणि स्थानिन इति चतुर्थी, नृसिंहमनुकूलयितुं नमस्कुर्म इत्यर्थावगमात् । नमस्कृत्येति । क्त्वान्तेन गतिसमासे समासेऽनञ्पूर्वे इति क्त्वो ल्यप् । साक्षात्प्रभृतित्वात् गतिसंज्ञायां नमस्पुरसोर्गत्योरिति सः । परिभाव्य विचार्य । परौ भुवोऽवज्ञाने इति लिङ्गात् परिपूर्वस्य भवतेर्विचारेऽपि प्रवृत्तेः ।

Colophon:

इति रामकृष्णभट्टकर्तृके सिद्धान्तरत्नाकरे संज्ञाप्रकरणम् ।

End:

प्रधीरिति । प्रध्यायतीति विग्रहे ध्यायतेः संप्रसारणं चेति क्विप्संप्रसारणपूर्वत्वे हल इति दीर्घत्वम् । नदीकार्यं त्वस्य नास्ति, नित्यस्त्रीत्वाभावात् । उन्न्याविति । नायं धात्ववयवसंयोग इति यण् भवत्येवेति भावः । इवर्णान्तधातुनाङ्गविशेषणात् हरीनित्यादौ न यण् । न चेयङुवङोर्विषय एवापवादभूतस्य यणः प्रवृत्त्या .

357. 9. G. 39.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 93 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

As the work is quoted in the Laghuśabdenduśekhara, the author must be earlier than Nāgeśa.

Contains the Uttarārdha incomplete.

Beginning :

यं संपूज्य बुधाः सिद्धिमिन्द्राद्याः प्राप्नुवन् स्विकाम् ।
द्वैमातुरः स नः पायाद्विघ्नध्वान्तविभावसुः ॥
त्रायतां प्रकृतिः सा मामनेकानेकशक्तिका ।
व्यनक्ति शब्दरूपाणि सांनिध्यात्प्रत्ययस्य या ॥
अथोत्तरार्धं तनुते यथागमं
फणीन्द्रभाष्यादि विभाव्य यत्नतः ।
अमत्सराणां सुधियां विपश्चितां
मनो नरीनर्ति तु यत्र संततम् ॥

विघ्नविघाताय मध्ये शिष्टाचारप्राप्तं वस्तुनिर्देशरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थत उपनिबध्नाति—श्रौत्रेति । "मङ्गलादीनि मङ्गलमध्यानि" इत्यादि वृद्धिभूवादिसूत्रस्थं भाष्यमेवास्य मूलं बोध्यम् ।

End :

एवं चाकारश्रवणफलकादन्तत्वलिङ्गकल्पितवचनप्राप्तोऽसावल्लोपविकल्प इति तदर्थः फलित इति किमत्र व्याहतम्? अत एव निर्मूलं चेत्यशुद्धम , महता प्रबन्धेन मूलस्य प्रतिपादितत्वात् । प्रत्युत णिज्विकल्प एव निर्मूलः, युक्तिशाकटायनवोपदेवाद्यनेकग्रन्थविरोधात् । णिज्विकल्पवादिनो भवतोऽप्येषैव गतिरित्यवधेयम् ।

प्राचां ग्रन्थस्य निष्कर्षो मयाकारि यथामति ।
यथागमं च कृतिनः क्षमन्तां दूषयन्तु वा ॥

तदेवं वोपदेवकृष्णपण्डिताद्यनेकग्रन्थसिद्धलक्ष्याणामू-नापयत्यादीनामेव साधुता । न तूनति, अङ्कति औननदित्यादीनाम्, भाष्यकैयटाद्यनेकग्रन्थ.

358. 9. G. 41.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 94 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Contains the Kṛtprakarana complete.

Beginning :

त्रायतां प्रकृतिः सा मामनेकानेकशक्तिका ।
व्यनक्ति शब्दरूपाणि सांनिध्यात् प्रत्ययस्य या ॥
यं विद्वान् सर्वविज्ञाता यमविद्वान्न सर्ववित् ।
तं चिन्तये सदात्मानं . . . सुखाप्तये ॥
गोपीपीनकुचद्वन्द्वसङ्गादानन्दसुन्दर ।
यं त्वादर्शयसे श्रीश व्याचष्टे सुकृतीकृतः ॥

अर्थप्रत्यायनाय प्रयुज्यमानवाक्यानुशासनं तद्घटितपदानुशासनपूर्वकमिति सुप्तिङन्तं पदमित्यारब्धम् । तत्क्रमानुरोधेन तदुभयं निरूप्य सुपां त्वादीनां च प्रकृतित्वेनापेक्षितान् कृदन्तान् वक्तुमारभते—धातोरिति । प्राक् लादेशाद्धात्वधिकारः, न त्वा तृतीयपरिसमाप्तेरित्याह । अन्यथा एधते इत्यादौ विकरणैर्व्यवधानात् टेरेत्वं न स्यात् । एशः शित्वं सर्वादेशार्थं कर्तव्यं स्यात् ।

End :

अन्वग्भूत्वेति । इहान्वक्शब्दो देशविशेषपरः, नानुकल्पपर इति न णमुल् । किं तु क्त्वैव । नापि वैकल्पिक उपपादसमस इति सिद्धम् ।

युक्तिप्राचुर्ययुक्तेऽस्मिन् श्रीमद्रत्नाकरेऽतुले ।
कृत्प्रक्रिया पूर्तिमगाद्वेङ्कटेशस्य तुष्टये ॥

Colophon :

इति श्रीमद्वेंकटभट्टपादात्मजतिर्मलभट्टपादतनूजरामकृष्णभट्टकर्तृके वैयाकरणसिद्धान्तरत्नाकरे कृदन्तप्रक्रिया ।

विद्वानभूद्वेंकटभट्टपाद-
स्तदात्मजात्तिर्मलभट्टपादात् ।
श्रीरामकृष्णो जनिमान् विनीतः
फणीन्द्रभाष्यार्णवभावनार्थी ॥
गौरीशसक्तो जनुषः फलार्थी सिद्धान्तरत्नाकरमर्थगूढम् ।
अदीपयं तेद्भवरत्नपुष्पैः संपूजये शंकरपादपद्मम् ॥
श्रीरामकृष्णेन मया समुद्भृतः
पातञ्जलाद्भाष्यमहोदधेः सताम् ।
सिद्धान्तरत्नाकर इत्ययं मुदा
तोतुष्यतां शंभुरतः सहोमया ॥
ब्रह्म प्रकाशितं येन शाब्दं सच्चित्सुखात्मकम् ।
सर्वज्ञः सुमहातेजाः स मे सेव्यः पतञ्जलिः ॥

The former owner of the MS.—Nṛsiṁhasomayājin son of Ahobalādhvarin.

359. 10. E. 71.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः— रामकृष्णभट्टकृतः

Paper. 811 Foll. 9 × 4 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants 31 leaves in the beginning and 23 leaves (746—768) in the middle.

Begins in the course of Paribhāṣāprakaraṇa and ends in the Lakārārthaprakriyā in the Uttarārtha.

Beginning :

ऋभुक्षणमिन्द्रमित्याद्यर्थत्वेन तस्याप्यावश्यकत्वात् । 'वा षपूर्वस्य निगमे' इति वेद उपधादीर्घस्य वैकल्पिकत्वात् । तस्मादुक्तदूषणानां का गतिरित्याशङ्क्याह— गुणवृद्धिशब्दाभ्यामिति । पूर्वसूत्राभ्यां गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनस्तदुपादानं पूर्वसूत्राभ्यां तयोरनुवृत्तिमिहैव वा तदावृत्तिं सूचयति । तेन गुणवृद्धिशब्दोच्चारणेन यत्र तयोर्विधानं तत्रैवेयं परिभाषोपतिष्ठते इति कैयटः ।

केचित्तु—इह गुणवृद्धिग्रहणं न कर्तव्यं, पूर्वसूत्रद्वयं संपूर्णमिहानुवर्त्य वृद्धिरिति यत्रादैचो गुण इति यत्रादेङो भाव्यते तत्रैवेयमुपतिष्ठत इति व्याख्याने बाधकाभावादित्याहुः ।

End :

अन्यथा सक्तून्पिब धानाः खादेत्यभ्यवहरतीत्यत्र मूलोदाहरणे द्वित्वापत्तेः । लोडभावं प्रक्रम्याभ्यवहरतीत्यनुप्रयोगस्य हिस्वान्तयोर्विहितस्यासंगतत्वाच्च । एतेन लोडभावं प्रक्रम्य 'भ्राष्ट्रमटति खदूरमटति स्थाल्यपिधानमटतीत्येवायमटति' इति वृत्तिकृदुक्तानुप्रयोगोऽपि परास्तः । कालकारकसंख्यानां लटैव स्पष्टीकृतत्वाच्चेति दिक् । भ्रम एवेति । पुरुषांशे वचनांशे च काव्यव्याख्यातॄणामिति भावः । एवं च पुरीमवस्कन्देत्यादौ पुरुषवचनसंज्ञयोरभावेऽपि तिङन्तत्वं परस्मैपदात्मनेपदान्तत्वं च यथाशास्त्रं सिद्धम् ॥

युक्तिप्राचुर्ययुक्ते श्रीतिङे रत्नाकरेऽतुले ।
अपुस्फुरं लकारार्थान् वेंकटेशस्य तुष्टये ॥

Colophon :

इति श्रीमद्वेंकटाद्रिभट्टपादात्मजतिरुमलभट्टपादतनूजरामकृष्णभट्टकर्तृके वैयाकरणसिद्धान्तरत्नाकरे लकारार्थप्रक्रिया ॥

360. 20. I. 16

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः— रामकृष्णभट्टकृतः

Palm-leaf. 33 Foll. 17 × 2 inches. 10

lines in a page. Telugu script. Old. Injured. Clear writing.

Wants beginning in the S'abdādhikāra and breaks off in the Strīpratyayaprakaraṇa.

361. 22. I. 16.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Palm-leaf. 91 Foll. 15 × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Contains the Kārakaprakaraṇa complete and Samāsaprakaraṇa incomplete.

362. 40. C. 33.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 36 Foll. 8¾ × 3½ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Legible writing.

Incomplete.

Contains a fragment of the Samāsaprakaraṇa.

363. 19. L. 5.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 42 Foll. 17 × 1¼ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

This is an exhaustive and very useful commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The commentary is called Bālamanoramā, perhaps to distinguish it from the Prauḍhamanoramā of Bhaṭṭojidīkṣita. The author Vāsudevadīkṣita was the son of Annapūrṇāmbā and Mahādevadīkṣita. He was the pupil of Vis'ves'varadīkṣita, his elder brother. He is said to have acted as a priest or *adhvaryu* in the sacrifices performed by Ānandarāyamakhin, the famous minister of the King Sāhaji (1684 to 1710 A.D.), Sarfoji (1711 to 1727 A.D.) and Tukkoji (1728 to 1735) of Tanjore. The author, therefore, can well be assigned to the first part of the 18th Century A.D. Among the other works written by him, mention may be made to the Kutūhalavṛtti, an exhaustive commentary on the Pūrvamīmāṁsāsūtras, and Mahāgnisarvasva, a commentary on the Bhodhāyanas'rautasūtras.

Breaks off in the Sandhiprakaraṇa.

स जयति दिव्यनटेशो नृत्यति योऽसौ चिदम्बरसभायाम् ।
पाणिन्याद्या मुनयो यस्य च दयया मनोरथानभजन् ॥
अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किं चास्तु पतञ्जलये भ्रात्रे विश्वेश्वराय गुरवे च ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति वृद्धिसूत्रस्थभाष्यादिस्मृतिसिद्धकर्तव्यताकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् प्राचीनग्रन्थैरगतार्थतां विषयप्रयोजनसंबन्धाधिकारिणश्च सूचयन् चिकीर्षितं प्रतिजानीते—मुनित्रयमिति श्लोकेन । इयं वैयाकरणसिद्धान्तकौमुदी विरच्यत इत्यन्वयः ।

End:

वस्तुतस्तु जातिपूर्वादित्यस्य तत्रानुवृत्तेः गौरादित्वात् ङीष् इति युक्तम्। पुत्रघातसाहसस्य स्त्रीष्वेव संभवात् स्त्रीलिङ्गमेवोदाहृतम्। पुत्रहृतीति। द्वित्वाभावे . . .

364. 30. E. 8.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 67 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the Taddhita-prakaraṇa and goes on up to the end of the Pūrvārdha.

Beginning:

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते। वृद्धि आय लाभ शुल्क उपदा—एषां द्वन्द्वात्प्रथमाबहुवचनम्। ननु दीयत इति कथमेकवचनमित्यत आह—वृद्धिर्दीयत इत्यादिक्रमेणेति। एवं च तदस्मिन् वृद्धिर्दीयते, तदस्मिन् आयो दीयते, तदस्मिन् शुल्को दीयते, तदस्मिन्नुपदा दीयत इत्यर्थेषु प्रथमान्ताद्यथाविहितं ठञादयः स्युरित्यर्थः।

End:

अत्र द्वन्द्वं न्यञ्चीति वीप्सायां द्वित्वम्। अन्यत्र स्वार्थे बोध्यम्। अन्यत्रापि। द्वन्द्वानि सहत इत्यादावित्यर्थः। शीतमुष्णं च एकं द्वन्द्वम्। सुखं दुःखं चापरम्। क्षुत्तृष्णा चान्यदित्यादि। इह स्वार्थे द्वन्द्वः। अम्भावादि पूर्ववत्। चार्थे द्वन्द्वनिपातनादन्यत्रापीति सिद्धम्।

Colophon;

इति द्विरुक्तिप्रक्रिया।

इति वासुदेवदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पूर्वार्धं समाप्तम्।

An extra leaf added at the end contains a letter written in Tamil as following.

. . . . . அப்படியிருந்தால் அதை அவருக்கு உடனே சொல்லிவிடவேண்டியது. தேவரீரும் அக்கரையாய் சொல்லி அனுப்பிச்சபடியினாலே அத்தனை தூரம் அவரை தைரியமாய் அனுப்பிவித்தேன். வேணும் விஞ்ஞாபனம். அர்த்தோதயத்துக்கு மகாராஜா அகண்டகாவேரிக்கு வரது ஒண்ணு. மகாராஜாவுக்காக சக்கரபாணிசுவாமிக்கு அர்ச்சனை பண்ணி தெரியப்படுத்தின கடுதாசிக்கு பதில்.

365. 21. G. 14.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 55 Foll. 15¾ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains a fragment of the Bhvādi.

366. 25. I. 3.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 123 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the S'abdādhikāra and breaks off in the Avyayaprakaraṇa.

367. 30. G. 29.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा— वासुदेवदीक्षितकृता

Palm-leaf. 71 Foll. 17×1⅜ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Strīpratyaya almost complete.

4 extra leaves are added at the end. Leaves 1 and 2 give the name of the former owner of the MS.—Cakravarti Srīnivāsācārya and they contain nothing else. Leaf 3*a* contains a few lines of the Strīpratyayaprakaraṇa of the Siddhānta. kaumudī. Leaves 3*b* to 4*b* contain a few stanzas selected from the Kaliviḍambana and Sabhārañjanas'ataka of Nīlakaṇṭhadīkṣita.

368. 9. K. 13.

सिद्धान्तकौमुदीव्याख्या सुखबोधिनी— नीलकण्ठवाजपेयिकृता

Paper. 1935 Foll. 8×6¼ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 8 volumes.

This is another commentary called Sukhabodhinī on the Siddhāntakaumudī. The author Nīlakaṇṭhavājapeyin was the son of Kāmākṣī and Varades'varayajvan and grandson of Rāmacandrādhvarin of Ātreyagotra. It is said that the author's father Varades'varayajvan learnt S'āstras from Appayadīkṣita's son and died at Benares as an ascetic. Nīlakaṇṭha had an elder brother called Sundares'varayajvan who wrote the Pāṇinipradīpa and some other works. Jñānendrasarasvatī, the author of Tattvabodhinī (Siddhāntakaumudīvyākhyā) and one Veṅkaṭes'vara were preceptors of Nīlakaṇṭha. Among the authors and works quoted herein the following may be mentioned.—Bhāṣyatattvaviveka, Vis'ves'varavijaya, Tattvbodhinīgūḍhārthadīpikā, Laghus'abdakaustubha (all these four were written by him); S'abdakaumudī by S'okkanātha, S'ābdikarakṣā by Dvādas'āhayājin, Vedāntabhūṣaṇa by Kaivalyendra (See No. 7575 Tanjore Des. Cat.)., Dhātucandrodaya, Prakriyāprasāda by Viṭṭhala, Siddhāntaratnākara by Rāmakṛṣṇabhaṭṭa, Vaiyākaraṇamatonmajjanī by Bhaṭṭojidīkṣita, Durghaṭavṛtti; Pañcikā, Sarvasva, Līlāvatī (all the three on gr.) Vidyāsāgara, Cakrapāṇi, Haridīkṣita, Pravartakopādhyāya, S'rībhadra, Ratnakos'a, Pradīpavivaraṇa by Rāmacandrasarasvatī.

The work is divided into four Paricchedas. The first Pariccheda ends in the Pūrvārdha, the second in the Tiṅantaprakarana, the third in Kṛdantaprakaraṇa, and the fourth in the Svaraprakaraṇa.

Contains up to the end of Kṛtprakaraṇa, except the Taddhita and Dvirukti prakaraṇas.

Beginning:

विश्वेश्वरीं विशालाक्षीं गणेशं षण्मुखं गुरुम् ।
मुनित्रयं नन्दिकेशं भारतीं नौमि सिद्धये ॥
पदवाक्यप्रमाणानां पारगं विबुधोत्तमम् ।

रामचन्द्रमखीन्द्राख्यपितामहमहं भजे ॥
आत्रेयाब्धिकलानिधिः कविबुधालंकारचूडामणि-
स्तातः श्रीवरदेश्वरो मखिवरो योऽयष्ट सर्वक्रतून् ।
अध्येष्टाप्पयदीक्षितार्यतनयात् तन्त्राणि काश्यां पुनः
षड्वर्गानपि यो व्यजेष्ट शिवतां यः प्राप नः सोऽवतात्
श्रीवाजपेयिना नीलकण्ठेन विदुषां मुदे ।
सिद्धान्तकौमुदीव्याख्या क्रियते सुखबोधिनी ॥
अस्मद्गुरुकृतां व्याख्यां बह्वर्थां तत्त्वबोधिनीम् ।
विभाव्य तत्रानुक्तं च व्याख्यास्येऽहं यथामति ॥
महायासेन यल्लभ्यं तदनायासतो बुधाः ।
गृह्णन्तु सुखबोधिन्या पाण्डित्याय विमत्सराः ॥
तन्त्रे पाणिनिकर्तृके दृढतरं सत्संप्रदायाच्चिरं
भक्त्याधीत्य निबन्धजातमखिलं शेषीयभाष्यं पुनः ।
टीकाभिः परिभाव्य सारमखिलं ये जानते पण्डिता-
स्तेष्वेकोऽपि विलोकयेन्मम कृतिं धन्यो मदीयः श्रमः ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नेन परिसमाप्तये 'मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति' इति महाभाष्योक्तविशेषफलावाप्तये च प्रकृतशास्त्रनिर्मातृत्वेनाभ्यर्हितानां सूत्रवार्तिकभाष्यकाराणां पाणिनिकात्यायनपतञ्जलीनां मुनीश्वराणां नमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् विषयप्रयोजनादीनि च ध्वनयन्नात्मनो निगूढार्थतत्त्वज्ञत्वं च ज्ञापयन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । शास्त्राविरुद्धसूक्ष्मयुक्तिभिः पुनः पुनरनुचिन्तनं मननम् । तच्छीला मुनयः । 'मन अवबोधने' इति तानादिकात् 'मन ज्ञाने' इति दैवादिकाद्वा 'मनोरुच्चोपधायाः' इत्युणादिसूत्रेण इन्प्रत्ययः, उपधाया उत्वं च । किदित्यधिकारादिन्प्रत्ययश्च कित् । 'आर्धधातुकं शेषः' इति इन्प्रत्ययस्यार्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इति प्राप्तो गुणः 'क्ङिति च' इति प्रतिषेधान्न भवति ।

End :

यत्तु 'विष्णुरात्मा भगवतो भवस्यामिततेजसः' इति कर्णपर्वणि भारतवचनं, तद्विष्णोः शिवभक्तशिरोमणित्वेन तदन्तर्यामित्वादिति न काप्यनुपपत्तिरिति । तस्मात् ब्रह्म जगत्कारणं ध्येयं चेत्यवगच्छद्भिः तत् ब्रह्म किंदेवतारूपमिति जिज्ञासुभिरत्याश्रमिभिः कृतो विचारः 'ब्रह्मवादिनो वदन्ति किं कारणम् कुतस्तस्य जाता वर्तन्ते केन क्व च सम्प्रतिष्ठा अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्' इति विप्रतिपत्तिं कृत्वा तदुत्तरं कालस्वभावनियतिमहाभूताद्यप्रधानपुरुषमेलिनोऽन्तःकारणतत्त्वस्य यादृच्छिकत्वस्य चाकारणकत्वस्य सुवचतया ब्रह्मणो जनककारणत्वं कथमिति शङ्कां निराकर्तुमग्रिममन्त्रः । कालस्वभावो नियतयदृच्छाभूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां तत्वाभावात् आत्माप्यनीशः सुखदुःखहेतोरिति । अनेन कालादिनिरासोत्तरं स्वतो निर्णेतुं शक्तानामत्याश्रमिणां देवीप्रसादात्तदवगति . . . . मन्त्रेण ते ध्यानयोगानुग . . . स्वगुणे निरूढार्थमित्यन्तेन प्रतिपाद्य ततो यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति मन्त्रेण तमपश्यन्निति क्रीडया अनुषङ्गवशात् परदेवताप्रसादात्तदर्थलाभ इति प्रतिपादनान्निरुपपदं ब्रह्म साम्बशिव एव । अत एव 'अथातो ब्रह्मजिज्ञासा' इत्यत्र शिव एव ब्रह्मादिजनको जिज्ञास्यत्वेनाद्ये ब्रह्मसूत्रे प्रतिज्ञातः । तथा चायं सूत्रार्थः—अथ साधनसम्पत्त्यनन्तरम्, अतः अकारवाच्याद्विष्णोर्यत्परं ब्रह्म, तस्य जिज्ञासेति । तस्य च लक्षणमुत्तरसूत्रेण—जन्माद्यस्य यत इति । अस्य विष्णोः यतः जन्मादि तद्ब्रह्मेति वेदितव्यमिति । ततश्च तद्ब्रह्म शास्त्रृ अस्य योनित्वात् कारणत्वादित्यादि प्रामाणिका व्याचख्युः । अतश्च सर्वोत्तमो मुमुक्षुभिर्ध्येयः शिवः साम्ब इति युक्तं तद-

र्पणम् । तत्प्रीतिश्च पुरुषार्थहेतुरिति सर्वेष्टसिद्धिः । विस्तरस्तु अस्मत्कृतविश्वेश्वरविजयग्रन्थेऽनुसन्धेय इति संक्षेपः ।

श्रीवाजपेयिना नीलकण्ठेन कृतयानया ।
व्याख्यया सुखबोधिन्या विश्वेशः प्रीयतां मुदा ॥

इति श्रीमदात्रेयान्वयरत्नाकराभ्युदितश्रीकलानिधिपदवाक्यप्रमाणपारावारपारीणस्य श्रीरामचन्द्राध्वरिवरसूरेः पौत्रेण सर्वतन्त्रस्वतन्त्रस्य श्रीवरदेश्वरयज्वशर्मणः पुत्रेण पाणिनिप्रदीपाद्यनेकप्रबन्धनिर्माणधुरीणस्य सुन्दरेश्वरयज्वशर्मणोऽनुजेन श्रीकामाक्षीगर्भाभ्युदितेन ज्ञानेन्द्रभगवत्पादपूज्यशिष्येण श्रीवेङ्कटेश्वरपादारविन्दपरिचर्यालब्धविद्यावैशद्येन श्रीनीलकण्ठवाजपेयिना विरचितायां सिद्धान्तकौमुदीव्याख्यावां सुखबोधिन्याख्यायां कृदन्तनिरूपणं नाम तृतीयः परिच्छेदः ।

श्रीकृष्णार्पणमस्तु ।

The Scribe of the original MS. of which the present MS. is a transcript, adds the following stanza and the date of copying.

Vol. IV ending in the Samāsāśrayavidhi

" अविरलकृतवर्णभ्रेषणं पुस्तकेऽस्मिन्
रचितमनवधानाल्लेखिनीदूषणं वा ।
अनुचितमथवा यद्भ्रान्तो वर्णराजेः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥ "

கர ௵ ஆடி மீ 27௳ கிருஷ்ணபக்ஷம் திருதீயையும் ஸோமவாரமும் பூரட்டாதி நக்ஷத்திரத்து நாள் நீலகண்டவாஜபேயதீக்ஷிதருடைய ஸமாஸகிரந்தம் எழுதி நிறைந்தது. இது எழுதினது வெங்கடாசலம் ஸ்வஹஸ்த லிகிதம். ग्रन्थसंख्या. 3500.

Vol. VI ending in the Tiṅantakāṇḍa :

अविरलकृतवर्णभ्रेषणं etc.

பிலவங்க௵ ஆனி மீ 15௳ புதன் கிழமை ப்ரதமையும் புனர்வஸு நக்ஷத்திரத்தின் நாள் திருந்தம் நீலகண்டவாஜபேயி தீக்ஷிதர் பண்ணின கிரந்தம் கோமல் கஸ்தூரி அய்யன் குமாரன் ஸ்வஹஸ்த லிகிதமாக எழுதி முடிந்தது.

369. 19. G. 28.

सिद्धान्तकौमुदीव्याख्या सुखबोधिनी—नीलकण्ठकृता

Palm-leaf. 101 Foll. $14\frac{3}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Good. Clear writing.

Begins in the Unādi and breaks off in the Svaraprakriyā.

उणादिसूत्रधातूनां तदुदाहरणेषु च ।
अनुक्तार्थकशब्दानां व्याख्यानं क्रियतेऽधुना ॥

उणादयो बहुलमिति सूत्रे उणादिपदस्य प्रविष्टत्वात्तज्जिज्ञासायामवश्यं वक्तव्यत्वेन तं निरूपयितुं शिष्यावधानाय प्रतिजानीते—अथेति । उणादिसूत्रारम्भे मङ्गलं कर्तुमुचितमित्यथशब्दप्रयोग इति भावः । उण् आदिर्येषां प्रत्ययानामिति तद्गुणसंविज्ञानो बहुव्रीहिः ॥ कृ ॥ डुकृञ्, कॄ हिंसायामिति चेति केचित् । अनभिधानादर्थाननुगमाच्च नायमित्यन्ये । वा गतिगन्धनयोः, पा पाने, पा रक्षणे, जि जये, जि अभिभवे, इत्युज्वलदत्तः ; डुमिञ् प्रक्षेपणे, स्वाद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ, एभ्य उण्प्रत्ययः स्यात् । करोतेरेवेति ध्वनयति—करोतीत्यादि । कारुरिति सिद्धम् ।

End :

ननु प्रतिपदोक्तत्वात् यदादिभिः साहचर्याच्च निपातस्यैव एच्छन्दस्य ग्रहणं स्यादिति चेत्, सत्यम् ;

एतदेव ज्ञापयति-अस्मिन्नेव प्रकरणे नेदमुभयं व्यवस्थापकमिति । तेन यावद्यथाभ्यामित्यत्र यत्तदेतेभ्यः परिमाणे वतुबिति व्युत्पादितस्यापि लाक्षणिकस्यानिपातस्यापि ग्रहणं भवति । यावत्स्तोतृभ्योऽरदो गृणाना इति । अरद इति अदूस्वरेणाद्युदात्तः । युक्तग्रहणं किम्? अन्वाचिते मा भूत् । यावत् क च ते मनो दक्षं दधस उत्तरम् । इह यत्रेत्यस्योत्तरमित्यनेन साक्षात्संबन्धः । दध धारणे । अनुदात्तेत् ॥ नह प्र ॥ नहशब्दो निपातसमाहारो निषेधे वर्तते । नह भोक्ष्यस इति । अदुपदेशात्परत्वात् से इत्यस्य निघातः । स्यस्तु प्रत्ययस्वरेण ।

370. 21. Q. 15.

सिद्धान्तकौमुदीव्याख्या— मितवादिनी

Palm-leaf. 120 Foll. $7\frac{3}{4} \times 1\frac{1}{4}$ inches. 8 lines in page. Malayālam script. Old. Good. Good writing.

This is a gloss on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. As indicated by the title Mitavādinī, the commentary is very brief. The author says that he writes commentary on such portions as left unexplained in Prauḍhamanoramā. The author's name is not mentioned in the work. He worships the God Pallikoṇḍa enshrined at Nallore.

Breaks off in the beginning of the S'abdādhikāra.

Beginning :

नल्लूरुस्वामिनं नत्वा पल्लिकोण्डाख्यमच्युतम् ।
सिद्धान्तकौमुदीव्याख्यां करोमि मितवादिनीम् ॥
सिद्धान्तकौमुदीव्याख्या प्रसिद्धास्ति मनोरमा ।
तत्र यद्व्याकृतं मूलं तन्नात्र प्रतिपाद्यते ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । त्रयोऽवयवा यस्य त्रयम् । संख्याया अवयवे तयबिति अवयववृत्तेः संख्यावाचिनस्त्रिशब्दादवयविन्यर्थे तयप् । अवयवी त्वत्र समुदाय एव । द्वित्रिभ्यामिति तयपोऽयच् । मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः । अत्र मनेरुच्चेत्युणादिसूत्रेण मनेरत उकारः, मनेः पर इन्प्रत्ययश्च । तेषां पाणिनिकात्यायनपतञ्जलीनां त्रयं मुनित्रयम् । अत्र समुदायस्यातिरिक्तत्वेऽपि तद्घटकत्वेन मुनीनां प्रत्यभिज्ञानात् मुनित्रयनमस्कारस्य दुरितनिवर्तकत्वमस्त्येव । ननु स्वयंभुवे नमस्कृत्येतिवत् मुनित्रयमित्यत्रापि नमःस्वस्तीत्यादिना चतुर्थी स्यात् । मैवम्, उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वचनात् नमस्करोति देवानितिवत् द्वितीयाया एव युक्तत्वात् ।

End :

अत्राहुः—प्रयोगनियमार्थमिदम् । पर एव प्रत्ययो न केवल इति । अन्यथा प्रत्ययार्थमात्रविवक्षायां किमस्य द्वयसमित्याद्यपि प्रयुज्येत । यदि तु प्रकृतिविशेषोद्देशेनैव प्रत्ययस्य विधानात् केवलो न प्रयोक्ष्यत इति ब्रूषे, तथापि प्रकृत्यर्थमात्रविवक्षायां केवलं प्रकृतिः प्रयोज्येतैव । अतः प्रत्ययः परो भवत्येवेति नियमार्थमिदम् । अपदत्वनिष्पत्तेश्चायं नियमः । तदेतदुच्यते न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति । अपदं न प्रयुञ्जीतेति वा । अपरिनिष्ठितं न प्रयुञ्जीतेति तस्यार्थ इति ।

371. 19. G. 26.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 54 Foll. $16\frac{3}{4} \times 1\frac{1}{8}$ inches.

7 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

A commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita by Kṛṣṇas'āstrin of Saṅkepalli family, pupil of Vināyakaguru. The commentary is called Sudhākara. The author herein criticizes the S'abdendus'ekhara of Nāges'a.

Breaks off in the स्वादिसन्धि.

Beginning:

श्रीमौनिविनायकगुरुचरणारविन्दाभ्यां नमः ।

वन्दे वाञ्छितलाभाय वृषवीश्वरवाहनौ ।
नगेशकेशतनयाजानी नागेशवन्दितौ ॥ १ ॥
यो दृष्ट्वा परतन्त्रजातमखिलं ह्यल्पप्रसादं मुनिः
सर्वेषामुपकारकं सुकृतिनां तन्त्रं चिकीर्षुर्दृढम् ।
भक्त्याविष्कृतचन्द्रशेखरकरोद्गासीडयढक्काश्रुत-
श्रौतज्ञापितमूलकं तदकरोत्तस्मै नमस्तीर्थिने ॥ २ ॥
सूत्रानुक्तैर्दुरुक्तैः कबलितविषयान् सर्वतो भावयित्वा
चर्चामूलाविलोलप्रकटितसुवचःपङ्क्तैराप्यतेव ।
तीर्थं दाक्षीसुतोत्थं जनहृदयमलध्वंसि येनात्तवाचा
तस्मिन्गाढावसक्ता मम वसतु नतिर्मेवमेशेऽखिलज्ञे?॥
दाक्षीपुत्रप्रणीतान् बहुतरविषयान् साध्वसाधुप्रतर्कान्
योगान् दोषप्रचारस्थगितनिजहृदो वाक्यकृद्यांश्चकार।
तान् सर्वान् गूढभावान्निजमतिमणिनोद्दीपयन् ग्रस्तदोषान्
कुर्वन्नज्ञानबन्धं दलयति नितरां योऽहिराट् तं नमामि ॥
भक्ताज्ञानतमोभेत्ता भाव्यः पाण्डित्यभास्करः ।
यत्कृपालेशमात्रेण तस्यै वाण्यै नमोऽस्तु मे ॥ ५ ॥
यद्यपीयं दुरूहोक्तिर्दीक्षितार्यकृतिः स्वतः ।
तथापि स्यान्मौनिपादसेवनात्सूहसूक्तिका ॥ ६ ॥
यत्पादाम्बुजसेवाप्तसन्मतिः सूरिसम्मतः ।
तान् श्रीविनायकगुरून् वन्दे वागीश्वरोपमान् ॥७॥
संकेपल्यन्वयाम्बोधिविधुश्रीकृष्णशास्त्रिणा ।
सिद्धान्तकौमुदीमोदः क्रियतेऽयं सुधाकरः ॥ ८ ॥

विघ्नविघातायाचरितस्य मङ्गलस्य शिष्टाचारपरंपरागततां सूचयन् शिष्यशिक्षार्थं तदुपनिबध्नाति—मुनित्रयमिति। मुनीनां त्रयं मुनित्रयमिति विग्रहे षष्ठ्यन्तस्य प्रधानसमुदायान्वयेन सामर्थ्यसत्त्वात् षष्ठीति समासः। मुनिसंबन्धिनं त्र्यवयवकं समुदायमिति बोधादन्येषां साक्षात्तत्संबन्धिनमुपादायाश्रयत्वासंभवेन न तत्संबन्धिनां घटादीनां त्रयाणां समुदायस्य ग्रहणशङ्केति भावः।

End:

स्वार्थगतसंख्याभिधायित्वरूपः संबन्धः षष्ठ्यर्थः। एतत्तदर्थगतसंख्याभिधायी यः सुप्तस्येत्यर्थः। एतत्तदोरनन्तर इत्यर्थस्तु न पदस्वरसलभ्यः, अध्याहारप्रयुक्तगौरवप्रसङ्गात्। एवं हि पञ्चमीमेवोच्चारयेत्। तेन परमैष ददाति परमस ददातीति सिद्धम्। अर्थद्वारकसंबन्धाश्रयणे चानञ्समास इति लिङ्गम्। न चास्योपसर्जनत्वात्तत्रै . . . . ।

372. 19. G. 31.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 180 Foll. 17 × 1 inches. 7 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

The last 4 leaves are broken.

Begins in the Course of S'abdādhikāra and breaks off in the Samāsās'rayavidhi.

Beginning:

. . . . . र्येणापादादावित्यस्याप्यसंबन्ध इत्याशयात्। अत्राग्ने इत्यस्याविद्यमानवद्भावप्रतिषेधादामन्त्रितस्य चेत्याष्टमिकनिघातसिद्धिः फलं बोध्यम्। विभा-

षितं वक्ष्यामिति । अन्यथा नामन्त्रिते इति पूर्वसूत्रस्य चास्य च विषयविभागो न स्यादिति तद्भावः । विशेषवचन इत्यस्यार्थमाह—विशेषणे इति ।

End :

किष्किन्धेति । किं किं दधातीति विग्रहे आतोऽनुपसर्गे इति कः । पूर्वमकारस्य लोपः । उत्तरवर्णस्य सुट् षत्वं च निपात्यते । . . . . समासे परशब्दस्य पूर्वनिपाते च परःशतानीत्यप्युदाहरणम् । तद्बृहतोः । गणसूत्रमिदम् । एवं त्रायस्वेत्यपि ।

373. 19. G. 32.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 135 Foll. 17 × $\frac{7}{8}$ inches. 4 lines in a page. Telugu script. Old. Injured. Legible writing.

Wooden boards are added to both sides.

Contains the Vaidika and Svara prakaraṇas.

Beginning :

अथ वेदमात्रगोचरप्रयोगप्रक्रियामष्टाध्यायीक्रमेणारभते । यद्यपि स्वरप्रक्रियाया लोकवेदोभयविषयकत्वादितः पूर्वमेव निरूपणमुचितं, तथापि वैदिकप्रयोगवत् लौकिकप्रयोगेषु स्वरविशेषादर्शनेन तस्या अपि वैदिकप्रक्रियासादृश्यं बोधयितुमित उत्तरं तन्निरूपितमिति बोध्यम् । यद्यपि षष्ठीयुक्त इत्यत्र वेति योगविभागात्तत्र तत्र बहुलग्रहणे छन्दसि दृष्टानुविधानमात्रसत्त्वाच्च तत्सकलं सिद्धम् ।

End :

तेनाग्नाविष्णू इत्यादाववग्रहेऽप्यनु . . . पदविभागे . . न . . सादायुः । अग्निमीळे इत्यादौ तिङतिङ इति निघातश्च सिध्यति । संहिताधिकारस्थं तु यणादिकं स्वरितप्रचयादिकं च नेत्यवसेयम् । इत्थमन्यत्रापि मुनित्रयवचांसि तत्प्रातिशाख्यानि तद्भाष्यातृगिरो निरुक्तादिग्रन्थांश्च पर्यालोच्य निष्कर्ष उन्नेयः । तदाह—यथाशास्त्रमिति सर्वेष्टसिद्धिः ।

सुधाकरे सुधीस्वान्तकुमुदोल्लासकारिणि ।
परार्धे पूरितं तेन प्रीयतां सशिवः शिवः ॥

Colophon :

इति श्रीप्रतोदिवैयाकरणकण्ठीरवसंकेपल्ल्युपनामककृष्णशास्त्रिविरचितायां सुधाकराख्यायां सिद्धान्तकौमुदीव्याख्यायामुत्तरार्धं परिपूर्णतामगमत् ॥

374. 10. D. 21.

सिद्धान्तकौमुदीटिप्पणम्—पङ्क्तिप्रकाशः

Paper. 15 foll. 11½ × 4¼. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This also is a brief commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The names of the commentary and its author are not found in the portion of the commentary contained in this MS. But in the margins of leaves the words Paṅktiprakās'a and Tārakānanda are written. From this it may be presumed that the commentary is called Paṅktiprakās'a and its author was Tārakānanda.

Breaks off in the Visargasandhiprakaraṇa.

Beginning :

परान्नित्यं बलवत् । यथा तुदतीति । अत्र तुदधातोर्लटि तिबादेशे च पुगन्तलघूपधस्य चेत्यनेन गुणः प्राप्तः । तुदादिभ्यः श इत्यनेन शप्रत्ययोऽपि प्राप्तः । विप्रतिषेधे परं कार्यमित्यनेन परत्वाद्गुणादेशः प्राप्तः ।

नित्यस्य च परापेक्षया बलवत्त्वेन परमपि गुणादेशं बाधित्वा नित्यत्वाच्छ एव भवति । अन्यथा तोदतीत्यापत्तेः । नित्यस्य बलवत्त्वे बीजं च अक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावस्यैवाभावकल्पनं न्याय्यमिति । पूर्वापेक्षया परस्य बलवत्त्वे बीजं तु विप्रतिषेधे परं कार्यमिति स्पष्टतरम् । अत एव तत्र तत्रादरेण नोदाहार्यते ।

End :

अतः कृकमीति सूत्रस्थकंसग्रहणज्ञापितप्रकृतिप्रत्ययविभागशून्याव्युत्पत्तिपक्षे प्रत्ययभिन्नरूपस्य विसर्गस्याक्षतत्वात् पर्युदासासंभवेन षत्वप्राप्तौ संपुंकानामिति वार्तिके पुंग्रहणम् । तथा सति वार्तिकस्थपुंग्रहणेनैव व्युत्पत्तिपक्षप्राप्त≍क≍पयोरव्युत्पत्तिपक्षप्राप्तषत्वस्य च बाधेन सकारे पुंस्कोकिल इत्यादिप्रयोगाणां सिद्धिर्भवति, नान्यथेत्याशयं मनसि निधायाह—व्युत्पत्तीत्यादिना । एतेन प्रत्ययभिन्नस्येति विसर्गस्य सामानाधिकरण्यान्वये प्रत्ययसंबन्धिसकारसत्त्वेन पक्षद्वयेऽपि प्रत्ययभिन्नरूपविसर्गस्याक्षतत्वेन षत्वप्राप्ताविति वाच्यत्वापत्त्या ≍क≍पयोः प्राप्तावित्यसंगतमित्यपास्तम् । वैयधिकरण्येन व्याचक्षाणानां प्राचां मतेनेदमिति मनोरमाग्रन्थस्तु पातेर्डुम्सुन्निति व्युत्पत्त्यनुसारेण नेयः । एतद्व्युत्पत्या टिलोपार्थडित्वसामर्थ्याद्याश्रयणं पूर्वोक्तव्युत्पत्त्या तु नेति विवेक्तव्यम् । षत्वप्राप्तावित्यत्र षत्वस्यापत्त्येत्यर्थो बोध्यः । इदमप्यनुनासिकपक्षे बोध्यम् । अनुस्वारपक्षे तद्व्यवधानाभावात् सर्वथापि षत्वाप्राप्त्या कुप्वोरित्यस्यैव प्रवृत्तेरित्यलं बहुना ।

375. 36. D. 8.

कौमुदीसारसंग्रहः—वेदान्ताचार्यकृतः

Paper. 98 foll. $8\frac{1}{4} \times 7\frac{1}{4}$. 14 lines in a page. Grantha script. New. Good. Good writing.

A summary of the Siddhāntakaumudī of Bhaṭṭojidīkṣita by one Vedāntācārya.

Contains the following Paricchedas :

(१) अक्षरस्वरूपनिरूपणम् (२) सन्धिनिरूपणम् (३) शब्दनिरूपणम् (४) वृत्तिनिरूपणम् (५) कृदन्तनिरूपणम् । (incomplete.)

Beginning :

अञ्जनाद्रिं जनानन्दसंजने रञ्जयच्चिरम् ।
चिन्मयं तन्मनोवर्ति तन्महो मन्महेतराम् ॥
विधाय विष्णोर्विनतिं वेदान्तार्यविपश्चिता ।
क्रियते बालबोधाय कौमुदीसारसंग्रहः ॥

इह खलु निखिलपुरुषार्थसाधनसंपिपादयिषाकबलितमानसानां जनानां शास्त्रज्ञानमन्तरा सिषाधयिषितफलसिद्ध्यभावात्, तत्र च—

धर्मार्थकाममोक्षाणामवश्यं ग्राह्यताज्जुषाम् ।
चतुर्णां पुरुषार्थानां सिद्धिं संपादयेन्नरः ॥

इति विवेकचिन्तामणिदर्शितन्यायेन चतुर्विधपुरुषार्थसिद्धिसंपादनस्य तुल्यत्वेऽपि, तत्रैव—

ऐहलौकिकमादौ स्यादथ स्यात् पारलौकिकम् ।
शर्म सर्वप्रयत्नेन तस्मात्तत्साधयेद्बुधः ॥

इत्युक्तप्रकारेण पूर्वमैहिकफलसंपादनस्य कर्तव्यत्वात्

अर्थशास्त्रपरिज्ञानादैहलौकिकभोगभाक् ।
आमुष्मिकानुभोगी स्यान्मोक्षशास्त्रपरीक्षणात् ॥

इत्यैहिकफलभोगस्यार्थशास्त्रज्ञानसाध्यत्वात् धर्मकामयोरप्यर्थसाध्यत्वेन तच्छास्त्रयोरप्यर्थशास्त्रपुरःसरत्वात् सर्वस्यार्थशास्त्रस्य पदज्ञानपूर्वकत्वात् श्लोके वाक्ये वा मिलिततया प्रयुक्तस्य तस्य पदस्य च संधिज्ञानमन्तराविभाज्यत्वात् * * * * *

* * * * कौमुदीसार-संग्रहनामकस्तादृशग्रन्थः प्रतिपाद्यते । तत्र च सर्वस्याप्यक्षरज्ञानपूर्वकत्वादादौ तावदक्षरस्वरूपं निरूप्यते ।

Colophon :

इति कौमुदीसारसंग्रहे अक्षरस्वरूपनिरूपणं नाम प्रथमः परिच्छेदः ॥

End :

भूतकालेऽप्यनद्यतनत्वे पारोक्ष्ये च गम्ये लिट्प्रयुज्यते । भूतकाले . . . . . त्वमात्रे गम्ये लङ् । केवलभूतकाले लुङिति विवेकः । अनद्यतनत्वं तु अतीताया रात्रेः पश्चार्धेन आगामिन्या रात्रेः पूर्वार्धेन च . . . .

376. 22. G. 23.

उणादिसूत्राणि

Palm-leaf. 5 foll. 18¾ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

As regards the nāmans or nouns in Sanskrit there are two different views among the grammarians. S'ākaṭāyana holds that all nouns have their derivations from roots, while Pāṇini opines that they are not derived, but have been used in the same form. The present work represents the former view and formulates rules of derivation. Though Pāṇini is not in favour of this view he seems not opposed to it as he has accorded his sanction to it in rule 3-3-1. As for the authorship of the work, Nāges'a on the traditional ground holds that these sūtras were not written by Pāṇini but were gleaned from certain ancient works by S'ākaṭāyana and others and given the present shape by certain responsible author so that the work may be considered as one of the supplements to the Aṣṭādhyāyī. Vimalasarasvatī, the author of Rūpamālā and Durgasiṁha, the author of Uṇādisūtravṛtti attribute the authorship to Vararuci *alias* Kātyāyana. Goldstücker and other modern scholars follow this view. S'vetavanavāsin, another commentator on Uṇādisūtras holds that these sūtras were written by Kātyāyana and others.

The work is divided into five pādas or chapters and hence is called Pañcapādī in order to distinguish it from Das'apādī, another recension of the work containing ten pādas. S'rīnivāsadīkṣita in his Svarasiddhāntacandrikā states that sixteen sūtras of the work deal with svaras or accents.

Complete in five pādas.

Beginning :

कृवापाजिमिस्वदिसाध्यशूभ्य उण् । आतो युच् । छन्दसीणः । दृसनिजनिचरिचटिभ्यो ञुण् । किंजरयोः श्रिणः । त्रो रश्च लः । कृके वचः कश्च । भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः । अणश्च । धान्ये नित् ।

End :

व्याङि घ्रातेश्च जातौ । हन्तेरच् घुर च । क्षमेरुपधालोपश्च । तरतेर्ड्रिः । ग्रहेरनिः । प्रथेरमच् । चरेश्च । मङ्गेरलच् ।

Colophon :

इत्युणादिषु पञ्चमः पादः ।

377. 22. G. 53.

उणादिसूत्राणि

Palm-leaf. 6 Foll. 17 × 1⅜ inches. 6 lines in a page. Telugu script. Old.

Injured. Good writing.
Complete in 5 pādas.

378. 23. I. 2.

उणादिसूत्राणि

Palm-leaf. 2 Foll. $16\frac{1}{8} \times 1\frac{1}{8}$ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains the 1st pāda only.

379. 28. J. 47.

उणादिसूत्राणि

Palm-leaf. 9 Foll. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete in 5 pādas.

380. 39. I. 4(*a*)

उणादिसूत्राणि—श्वेतवनवासिकृतवृत्ति-सहितानि

Paper. 189 Foll. 8×6 inches. 14 lines in a page. Devanāgarī script. New. Good. Legible writing.

Uṇādisūtras described in previous numbers are followed by a commentary written by S'vetavanavāsin son of Āryabhaṭṭa of Gārgyagōtra. The author is said to have lived in a village near Indugrāma. His forefathers are said to have lived in a village called Utterameru.

Complete in 5 pādas.

Beginning :

प्रणम्य भाष्यकाराय तन्मतस्पर्शशोधिताम् ।
व्याख्यामुणादिसूत्रस्य करिष्यामि यथामति ॥
कृपावाजिमिस्वदिसाध्यशूभ्य उण् ॥

डुकृञ् करणे, पा पाने, लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैवेति परिभाषया पिबतेरेव ग्रहणम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणमिति कृपा इत्यस्याग्रहणम्। वा गतिगन्धनयोः, जि जये, जि अभिभवे, उभयोरपि ग्रहणम्। डुमिञ् प्रक्षेपणे, स्वद आस्वादने, राध साध संसिद्धौ, अशू व्याप्तौ, एतेभ्यो धातुभ्य उण् प्रत्ययो भवति। णकारो वृद्ध्यर्थः युगर्थश्च। उणादिप्रत्ययान्ताः संज्ञाशब्दाः। तेन तेषामत्र स्वरूपसंवेदनस्वरवर्णानुपूर्वीमात्रफलमन्वाख्यानम्। अत एवाचार्यः पाणिनिः प्रतिपदविधिमनादृत्य लक्षणमेतत्सर्वं संग्राह्यं पठति उणादयो बहुलमिति। बहुलमुणादयो द्रष्टव्याः। येयं शाकटायनादिभिः पञ्चपादी रचिता तत्राप्येते न परिसमाप्ताः, संज्ञाया नानारूपत्वात्। तेनात्र ये अपठिताश्च प्रत्ययादिसंज्ञामपि ते बहुलं लभन्ते।

End :

मङ्गेरलच् ॥ मगिर्गत्यर्थः। नुम्। तस्मान्मङ्गेरलच्प्रत्ययः। मङ्गतीति मङ्गलं कल्याणम्। . . . . सूत्रेणैव मङ्गलमिति रूपस्य गम्यमानत्वात् शास्त्रपरिसमाप्तिसमये मङ्गल . . . म्।

Colophon :

इतीन्दुग्रामसमीपवर्त्यग्रहारवास्तव्येन उत्तरमेर्वभिजनेन धर्मशास्त्रपारगार्यभट्टसूनुना गार्ग्येण श्वेतवनवासिनाम्ना विरचितायामुणादिवृत्तौ पञ्चमः पादः। समाप्तेयं पञ्चपादी।

The last 3 leaves contain 14 sūtras explaining the origin of the Sanskrit alphabets अ, इ etc. and a gloss also is

written on these sūtras. It is not clear whether the gloss is Svetavanavāsin's or not.

The MS. is said to have been copied from a paper MS. belonging to the Palace Library, Trivandrum.

381. 39. I. 4(*b*)

उणादिसूत्राणि—श्वेतवनवासिकृतवृत्तिसहितानि

Paper. 167 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Complete in 5 pādas.

The MS. was copied from a paper MS. belonging to the Madras Govt. Oriental MSS. Library.

382. 38. I. 6·

उणादिसूत्राणि—दुर्गसिंहकृतवृत्तिसहितानि

Paper. 119 Foll. 8 × 6 inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

The Sūtras are slightly different from those of Pañcapādī described above. The work is divided into 6 pādas.

Complete in 6 padas.

Beginning :

नमस्कृत्य गिरं भूरिशब्दसंतानकारणम् ।
उणादयोऽभिधास्यन्ते बालव्युत्पत्तिहेतवे ॥
कृवापाजिमिस्वदिसाध्यशूदसनिजनिचरिचटिभ्य उण् ॥

एभ्यो धातुभ्यः (उण् प्रत्य) यो भवति । उणादयोऽपि भूतेऽपि । भूते काले । अपिशब्दाद्वर्तमाने भविष्यति च । ताभ्यामन्यत्रोणादयः । ताभ्यां संप्रदानापादानाभ्यामन्यस्मिन् कारके कर्तरि कर्मादौ यथाभिधानं प्रत्ययः पर इति परिभाषायामुणादयो भवन्ति । णकार युगाद्यर्थः । डुकृञ् करणे । करोतीति कारुः शिल्पी । वा गतिगन्धनयोः । वातीति वायुः समीरः । धेट् पापाने । पिबतीति पायुः अपानम् । जि जये । जयतीति जायुः औषधम् । डुमिञ् प्रक्षेपणे । मिनोतीति मायुः पित्तम् । गोपूर्वस्यान्यार्थं गां वाचं मिनोतीति गोमायुः सृगालः । स्वद स्वादने । स्वदत्ते स्वादु मधुरम् । राध साध संसिद्धौ । साध्यतीति साधुः कुशलः । अशूङ् व्याप्तौ । अश्नुते इत्याशुः शीघ्रम् । दृ विदारणे । दृणातीति दारुः काष्ठम् । सनु दाने । सनोतीति सानुः प्रस्थं शृङ्गम्, पर्वतैकदेशः । जन जनने । जायत इति जानुः अष्ठीवान् । चरिर्गत्यर्थः । चरतीति चारुः शोभनम् । चट स्फुट भेदे । चटतीति चाटुः पटुः वादी ।

End :

सावमेरिन् दीर्घश्च ॥ सावुपपदे अमेर्धातोरिन् प्रत्ययो भवति दीर्घश्च । अमु गतौ सुपूर्वः । शोभनममति स्वामी प्रभुः । इन्हनपूषेत्यादिना सौ दीर्घः ।

शब्दानामानन्त्याद्व्युत्पत्तिर्नैव दृश्यते येषाम् ।
तेषां विज्ञैः कार्या मान्यैर्धातुतः प्रत्यया युक्ताः ॥

Colophon :

दौर्गसिंह्यामुणादिवृत्तौ षष्ठः पादः समाप्तः ॥

Date of copying—Kālayukti year.

383. 38. H. 7.

उणादिसूत्राणि—माणिक्यदेवकृतवृत्तिसहितानि

Paper. 168 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Legible writing.

Uṇādisūtras in different recension are commented by Māṇikyadeva, apparently a Jain author. The MS. does not give the author's name. Yet from the MS. described in No. 263 of the Des. Cat. of Sanskrit MSS. in the Bhandarkar Oriental Institute, Poona. Vol. II, it is known that Māṇikyadeva was the author of the commentery.

For further particulars see the introduction of the printed edition in the Sarasvati Bhavana Texts Series No. 81.

Complete in 10 pādas.

Beginning :

स्वयंभुवे नमस्कृत्य प्रणिपत्य सरस्वतीम् ।
वक्ष्ये वृत्तिमुणादीनां यथाबुद्धि यथाक्रमम् ॥
अर्तिसृधृधम्यश्यवतरिभ्यो निः ॥

इहेमेऽधिकाराः संबध्यन्ते । प्रत्ययः, परश्च, आद्युदात्तश्च, अनुदात्तौ सुप्पितौ, धातोः, तत्रोपपदं सप्तमीस्थम्, कृदतिङ्, वासरूपोऽस्त्रियाम्, वर्तमाने लट्, पुवः संज्ञायाम्, उणादयो बहुलम्, भूतेऽपि दृश्यन्ते, भविष्यति गम्यादयः, कर्तरि कृत्, दाशगोघ्नौ संप्रदाने, ताभ्यामन्यत्रोणादयः, कालाः संबध्यन्ते । एते च स्वरितलिङ्गाः सङ्गृह्यमाणाः संग्राह्यमाणाः स्वविषयोद्भावनानुष्ठानसमर्थाः आ उणादिपरिसमाप्तेः दशपाद्यां सर्वत्रैवानुवर्तन्ते । अत्र यावतामधिकाराणां प्रयोजनं तत्र तावन्त एवाभिसंबध्यन्ते । एतेष्वनुवर्तमानेषु एभ्यो धातुभ्यो वर्तमानकाले यथासंभवं कर्त्रादिषु कारकेषु संज्ञाविषयेषु परः निप्रत्ययो भवति । 'ऋगतौ' भौवादिकः, ऋ सृ गतौ जुहोत्यादिः । ऋच्छति इयर्ति अर्यते वा अरणिः ।

End :

स्थः स्ताम्बजबकौ च ॥ २२ ॥

स्थाधातोः अम्बच् अबक इत्येतौ प्रत्ययौ भवतः । स्त् इत्ययं चादेशः धातोः । ष्ठा गतिनिवृत्तौ । तिष्ठतीति स्तम्बः समवायः । स्तबकः पुष्पापीडः कर्ता ।

Colophon :

इत्युणादिवृत्तौ प्रकीर्णको नाम दशमः पादः ।

384. 21. A. 67.

गणपाठः—पाणिनिकृतः

Palm-leaf. 22 Foll. 16¼ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

An enumeration of words undergoing common operations of the rules of Pāṇini. In certain sūtras Pāṇini mentioned only one word by adding the word आदि which means etcetera. The words meant to be included in the lists are specifically mentioned in this work. The author is believed to be Pānini as per stanza :

" अष्टकं गणपाठश्च धातुपाठस्तथैव च ।
लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात् ॥ "

Complete in 8 adhyāyas.

Beginning :

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

सर्वादीनि सर्वनामानि ॥ सर्व । विश्व । उभ । उभय । डतर । डतम । अन्य । अन्यतर । इतर । त्वत् । त्व । नेम । सम । सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् । तद् । यद् । एतद् । इदम् । अदस् । एक । द्वि । युष्मद् । अस्मद् । भवत् । किम् । इति सर्वादयः ॥

End :

आचार्यादणत्वं च । आकृतिगणोऽयम् । पाठान्तरम् । क्षुभ्न तृप्नु नृनमन नरनगर नन्दन यङ्नृती गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । इरिकादीनि वनोत्तरपदानि संज्ञायाम् । इरिका तिमिर समीर कुबेर कर्मार ॥

Colophon :

इति गणपाठे अष्टमोऽध्यायः । समाप्तश्च गणपाठः ।

385. 20. O. 13.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 25 Foll. 12¾ × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A list of verbal roots as meant by Pāṇini in his rules of Aṣṭādhyāyī. The roots are divided into 10 groups, namely भ्वादि, अदादि, जुहोत्यादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्रयादि and चुरादि. This work also is attributed to Pāṇini. The Commentators on Pāṇini opine that the meanings of roots were not written by Pāṇini; but one Bhīmasena added them in the Dhātupātha.

Complete up to the end of Curādi.

Beginning :

भू सत्तायाम् । एध वृद्धौ । स्पर्ध संघर्षे । गाधृ प्रतिष्ठालिप्सयोग्रन्थे च । बाधृ विलोडने । नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु । दध धारणे । स्कुदि आप्रवणे । श्विदि श्वैत्ये । वदि अभिवादनस्तुत्योः । भदि कल्याणे ।

End :

अन्ये तु दशगणपाठो बहुलं भवति । तेनेहापठिता अपि सौत्रा लौकिका वैदिकाश्च द्रष्टव्या इत्याहुः । इतरे तु नवगणीपठितेभ्योऽपि कचित्स्वार्थे णिच्, बहुलग्रहणात् । तेन रामो राज्यमचीकरदित्यादिसिद्धिरित्याहुः । चुरादिभ्य एव बहुलं णिजित्यन्ये । अङ्गवाचि प्रातिपदिकं निरसने णिङं लभते । श्वेताश्वाश्वतरगालोडिताह्वरकाणां चतुर्णां धात्वर्थे णिङ् अश्वतरतकलोपश्च द्रष्टव्यः । णिजेवेत्येके । पुच्छादिषु धात्वर्थ इत्येव सिद्धम् ।

386. 22. G. 23.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 13 Foll. 18⅜ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete up to the end of Curādi.

387. 22. P. 11.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 21 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete up to the end of Curādi.

The scribe adds :

साधारणाख्यके वर्षे भानौ कर्कटराशिगे ।
कृष्णपक्षे चतुर्दश्यां वारे भौमसमाह्वये ॥
श्रीवत्सगोत्रजातेन वेंकटेशेन धीमता ।
लिखिता भीमसेनेन कृता धात्वर्थमालिका ॥

388. 23. I. 2.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 15 Foll. 16⅛ × 1⅛ inches. 9 lines in a page. Telugu script. Old. Injured. Legible writing.

Complete up to the end of Curādi.

389. 25. K. 22.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 17 Foll. 14½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete up to the end of Curādi.

The scribe adds:

सौम्यनामसंवत्सरं चापमासं कृष्णपक्षं चतुर्थी सौम्यवासरे लिखितम् ।

Names of the scribes: Sesayyan and Ramasvamiayyan.

The fly-leaf at the end contain the stanza:

"कस्त्वं शूली प्रविश भिषजां वेश्म + पातु मां पार्वतीशः ।"

390. 28. A. 5.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 23 Foll. 13 × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Complete up to the end of Curādi.

The following colophon is read:

इति भीमसेनविरचितो धातुपाठः समाप्तः ।

Three fly-leaves are added at the beginning and they contain the following:

Fol. 1:

"धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥"

Fol. 2:

"वाणीममरवाणीं मधुरसवेणीं तनोतु कल्याणीम् ।"

2 b:

"वल्लवीवल्लव संलप रे मोहनदेव
उल्लसति मोहलतिकामेऽतीव— वल्लवी
सुललितयान सुमशरभान
सुकुमारतरगान शोभनैकतान— ,,
समधिकमोहे सरसि विगाहे
कथमिदमिह सेवे कामकेलिमोहे— ,, (२)
विधिलिपिरिति विदितमिहारे
सा यदि तव भाति साधु मानमेति— ,, (३)
कमलानुकूल करुणालवाल
कमनीयमृदुचेल कान्तनीलनील— ,, (४)
मधुकृतचारे मलयसमीरे
मनसि मम रागजविचारे महति मुरारे— ,, (५)
विलसति सोमे विरहिणि भीमे
विकसति हृदि कामे विहर मुरारे— ,, (६)
परिहर रोषं परिचिनु तोषं
नतजनपरिपोषं नौमि चारुवेषं— ,, (७)
दवनमतापादवन यदुभूप
देववरदत्तरूप तेऽहमनुरूप— ,, (८)
कान्तचलतोरि रामण्य सकल गोलंहरिं कान्त
वरवल्लवीजार गोपकिशोरारे
अजभजिताजसुन्दर छलतो (९)
न हि विरहं सहे प्रियसु तापिञ्छा-
भलभलावण्यधे दयां छलतो— (१०)
अयि नन्दनजानन्त बलिदनुजारे
सरसरतीशमोहन छलतो— (११)
मयि ते मनो न हि तावकीया हारे
वरदत्तदानवसंनुत छलतो— " (१२)

391. 28. A. 6.

धातुपाठः

Palm-leaf. 13 Foll. 16½ × 1¼ inches.

This is the well-known work on Prākṛta grammar written in Sūtra style. The author is named Vararuci who is, however, identified by some of the commentators with the famous author of the vārtikas on Pāṇini's grammar and also referred to by his synonymous name Kātyāyana in later works. According to this MS. the work is complete in eight chapters dealing with the first variety of the six kinds generally known in Prākṛta dialects namely---1. Māhārāṣṭrī, 2. S'aurasenī, 3. Māgadhī, 4. Pais'ācī, 5. Cūlikāpais'ācī and 6. Apabhraṁs'a. The metrical commentary on this work called Prākrtamañjarī also is complete in eight chapters dealing with the first of the six varieties said above. But the printed book edited by E. B. Cowell consists of 12 chapters of which 1 to 9 correspond to 1 to 8 of this MS. and 10 to 12 deal with Pais'ācī, Māgadhī and S'aurasenī.

Complete in 8 chapters.

Beginning:

आदेरतः । आ समृद्ध्यादिषु वा । इदीषत्पक्कस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु । लोपोऽरण्ये । ए शय्यादिषु । ओ बदरे देन । मयूरमयूखयोर्व्वा । चतुर्थीचतुर्दश्योस्तुना । अदातो यथादिषु वा ।

End:

आ कुत्सायाम् । रे अरे हरे संभाषणरतिकलहाक्षेपेषु । विवमिवविआ इवार्थे । शेषः संस्कृतात् । निपाता विंशतिः ।

Colophon:

इति प्राकृतव्याकरणसूत्रे अष्टमः परिच्छेदः ।

723. 35. C. 18.

प्राकृतप्रकाशवृत्तिः मनोरमा—भामहकृता

Paper. 17 Foll. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

A commentary on Vararuci's Prākṛtaprakās'a by Bhāmaha. The commentary is called Manoramā. Though this MS. does not give the commentator's name, another MS. of the same work described under the next number mentions it as Bhāmaha. Cowell's edition of this work divides it into 12 chapters while this MS.

into 10 chapters. The chapters 10 to 12 found in Cowell's edition are combined into one *i.e.*, the 10th chapter in the MS. The last part of the last chapter dealing with S'aurasenī has no commentary like the printed edition.

Complete in 10 chapters.

Beginning :

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः ।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥

आदेरतः । अधिकारोऽयम । यदित ऊर्ध्वमनुक्रमिष्या-मस्तदादेरतः स्थाने भवतीत्येवं वेदितव्यम् । आदेरेतत् आपरिच्छेदसमाप्तेरत इति च आ अकारविधानात् । वा समृद्धयादिषु । समृद्धि इत्येवमादिषु आदेरकारस्या-कारो भवति वा, समिद्धी । सामिद्धी । पअडं । पाअडं । आहिआई । माणंसिणी । पाडिवआ । सारिच्छं । पाडिसिद्धी । पासुत्तं । आसासो । पक्षे अहिआई इत्यादि । समृद्धिप्रकटाभिजातिमनस्विनी-प्रतिपत्सदृशप्रतिस्पर्धिप्रसुप्ताश्च । आकृतिगणोऽयम् ।

End :

अनन्त्य एच्च । मिपो लोटि च । आश्चर्यस्याच्छरि-अं । दोलादण्डदर्शनेषु । शेषं महाराष्ट्रीवत् । " महा-राष्ट्रोद्भावां भाषां विशुद्धं प्राकृतं विदुः " इत्युक्तेः ।

Colophon :

इति वररुचिविरचितायां प्राकृतमनोरमायां वृत्तौ भाषाविभागो दशमः परिच्छेदः ।

The reading of the above colophon is apparently wrong in respect of the authorship of the commentary as Vararuci.

The front page of the fol. 1 reads the following stanza :

" गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते तदपि खलु नो विस्मयपदम् ।
तथायं जीमूतो लवणजलधेर्वारि मधुरं
फणी क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥ "

The scribe adds :

" खखाङ्कचन्द्रवत्सरेऽगस्त्यनागसंयुते
पौषमासि कृष्णपक्षके विलेखितं हि पुस्तकम् ॥ "

724. 11. D. 104.

प्राकृतप्रकाशवृत्तिः मनोरमा—भामहकृता

Paper. 24 Foll. 8 × 3¾ inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains 1 to 11 chapters ; and the text only of the 12th chapter.

The following additional stanza is read in the beginning.

वररुचिरचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्या चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥

End :

प्रकृत्या दोर्दण्डदर्शनेषु । शेषं महाराष्ट्रीवत् ।

Colophon :

इति वररुचिकृते प्राकृतप्रकाशे मनोरमायां वृत्तौ द्वादशः परिच्छेदः समाप्तः ।

Date of copying :

संवत् १८३(?) भाद्रपदशुभ्रद्वादशी रवौ अक्रूर-पुरस्थेन आशारामेण लिखिता प्राकृतमनोरमा आत्म-पठनार्थं परोपकारार्थं च ।

The following stanza is read at the end.

पठतामपि वदतामपि
  चिन्तयतां चापि शृण्वतामपि वा ।
वररुचिविरचितवेद्या
  विद्या विद्योदयं तनुताम् ॥

725. 37. B. 10.

प्राकृतप्रकाशवृत्तिः— रामपाणिवादकृता

Paper. 87 Foll. 13 × 8¼ inches. 19 lines in a page. Devanāgarī script. New. Good. Good writing. Written on one side of paper. Transcribed from a MS. available in the curator's office Library, Trivandrum.

This is a commentary on Vararuci's Prākṛtaprakāśa by Rāmapāṇivāda who lived in the 18th Century A. D. The author is believed to have written a good number of other works, such as Kṛṣṇavilāsavyākhyā, Kaṁsavaho, Uṣāniruddho, Rāghavīya, Viṣṇuvilāsa etc., and is said to have been the disciple of Nārāyaṇabhaṭṭa, the famous Kerala author. The work has been printed and published by the Adyar Library under the editorship of Dr. C. Kunhan Rāja and Pandit K. Ramachandra Sarma. The MS. is complete in eight paricchedas.

Beginning :

सुकृतिभिरेव गृहीतो बहुविधरूपावतारगम्भीरः ।
जयति स भगवान् स विष्णुः प्राकृतशास्त्रप्रपञ्च इव ॥
प्रणिपत्य विघ्नराजं श्रीगुरुपादं मुनित्रयं वाणीम् ।
शंकरमद्रिसुतां च प्राकृतवृत्तिर्मया क्रियते ॥

तत्रादौ लिपिविन्यासः ससंकेतः क्रियते—

बिन्दुर्विधीयते योऽत्र यश्च स्वाभाविकस्तयोः ।
विन्यासो लिपुषु ज्ञेयस्ताभ्यां पूर्वस्य मूर्धनि ॥

ताभ्यां विधीयमानस्वाभाविकाभ्यां पूर्वो यो वर्णः तस्य मूर्धनि तयोर्बिन्द्वोर्विन्यासः । यथा विधीयमानः दंसइ-फंसो । स्वाभाविको यथा—कंसो हंसो ।

अनुस्वारस्त्वशास्त्रीयः परस्य द्वित्वसूचकः ।
वर्णयोः पूर्वपरयोरन्तराले विलिख्यते ॥

अस्मिन् शास्त्रे तावदविहितत्वादशास्त्रीयः । पे०ख़इ भि०ख़इ । अथ सूत्राण्युदाह्रियन्ते—

आदेरतः । अधिकारोऽयम् । आदेरित्येतदा परिच्छेदसमाप्तेरधिक्रियते । अत इति तु 'अदातो यथादिषु' इति सूत्रात्प्राक्तनेष्वधिकारः । इत ऊर्ध्वं येऽनुक्रमिष्यन्ते ते विधय आदेरकारस्य वेदितव्याः । वक्ष्यति 'लोपोऽरण्ये' । अरण्यं रण्णं ।

End :

रडयोर्ळः । कामो, णळो । अहमित्यत्र अहके । अहके ळोशपळित्ता । इत्येतावानेव विशेषः । तद्भवमेवेदमपि । तद्भवस्य संस्कृतात् पो वः, नो णः, टो डः, इत्याद्यक्षरविकारमात्रमेव । पैशाचेऽपि शषसां शः, रडलानां ळः इत्येतावन्मात्रमेव विशेष इति तावदत्रैवान्तर्भूतोऽयमपि विशेषः ॥

प्राकृतलक्षणमेतत्प्रायेणोक्तं प्रयोगमनुसृत्य ।
अपरमपभ्रंशादेर्लक्षणमन्यत्र विज्ञेयम् ॥

Colophon :

इति रामपाणिवादविरचितायां प्राकृतवृत्तौ अष्टमः परिच्छेदः । समाप्तेयं प्राकृतवृत्तिः ।

726. 9. F. 30.

प्राकृतप्रकाशव्याख्या प्राकृतमञ्जरी

Paper. 21 Foll. 6½ × 9¾ inches. 32

lines in a page. Grantha script. Old. Much injured. Good writing.

This is a metrical Commentary on Vararuci's Prākṛtaprakāśa described in No. 722. The author's name is not known. He refers to the author Vararuci by his synonymous name Kātyāyana. This work is complete in 8 chapters dealing with the first variety of the 6 kinds of Prākṛta language spoken in different localities. This work has been printed and published in Nirnayasāgara Press, Bombay. The editor of the publication says that Vararuci was the author of the text and commentary.

Complete in 8 chapters:

Beginning:

बाह्यान्तरं तमो भित्वा यज्ज्योतिर्भासते परम् ।
नमो भगवते तस्मै सूर्याय परमात्मने ॥
उदेतु भगवान्भानुरुदयाद्रेरिवात्मनः ।
येन वाचो यथार्था नः स्फुरन्ति सगुणाः स्वयम् ॥
प्रसीदन्तु च वाचस्ता यासां माधुर्यमुच्छ्रितम् ।
प्राकृतच्छद्मना चक्रे कात्यायनमहाकविः ॥
वन्दे वररुचिं तं च यत्प्रज्ञामञ्जरीमधु ।
अद्याप्यास्वादयन्त्येव हृद्यं विद्वन्मधुव्रताः ॥
व्याकर्तुं प्राकृतत्वेन गिरः परिणतिं गताः ।
कोऽन्यः शक्तो भवेत्तस्मात्कवेः कात्यायनादृते ॥
अहो तत्प्राकृतं हारि प्रियावक्त्रेन्दुसुन्दरम् ।
सूक्तयो यत्र राजन्ते सुधानिष्यन्दनिर्भराः ॥
यावत्प्राकृतसूत्राणि व्याख्यास्यामो वयं पुनः ।
न विद्यादर्पकण्डूत्या केवलं तद्विवित्सया ॥
कात्यायनप्रणीतेऽस्मिन्प्राकृताब्धौ तितीर्षया ।
अप्रज्ञापोततन्त्राय नमो मह्यं निमज्जते ॥
आदेरतः ।
आदेरित्यधिकारोऽयमा परिच्छेदपूरणात् ।
अत इत्यपि तस्मात्प्रागात इत्यपि यो विधिः ॥
एकस्मिन्नेव शब्दे स्यादेक एवादनेकशः ।
आदेरिति तदादेः स्यान्न पदादेरिति स्मृतिः ॥

End:

शेषः संस्कृतात् ।
कृत्तद्धितसमासादिः शेषो गम्येत संस्कृतात् ।
उक्तलक्षणवृत्त्यैव तत्सर्वं परिकल्प्यताम् ॥

Colophon:

इति प्राकृतमञ्जर्यामष्टमः परिच्छेदः । प्राकृतव्याकरणव्याख्या समाप्ता ॥

The Scribe adds:

क्रोधने वत्सरे मासि कुम्भे विंशतिवासरे ।
पुस्तकोऽयं समाप्तोऽभूदम्बिकानुग्रहाद् दृढम् ॥

727. 19. P. 11.

प्राकृतप्रकाशव्याख्या—प्राकृतमञ्जरी

Palm-leaf. 39 Foll. $17\frac{1}{8} \times 1$ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Breaks off in the 8th pariccheda.

Reads the following additional stanza in the beginning:

अश्रान्तमुत्पुलकजालमजस्रमाविः-
स्वेदाम्बुबिन्दु सततार्धनिमीलिताक्षम् ।
नित्यं दरोच्छ्वसितनीवि सदात्तकम्पं
श्यामारुणं मिथुनमस्तु शिवंकरं नः ॥

728. 24. L. 2.

प्राकृतप्रकाशव्याख्या—प्राकृतमञ्जरी

Palm-leaf. 31 Foll. 16 × 1 inches. 5

lines in a page. Grantha script. Old. Good. Good writing.

Complete in 8 chapters.

Three extra leaves are added at the end containing an errata of the MS.

729. 24. L. 4.

प्राकृतप्रकाशव्याख्या—प्राकृतमञ्जरी

Palm-leaf. 24 Foll. 17¾ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete in 8 paricchedas.

730. 25. E. 13.

प्राकृतप्रकाशव्याख्या

Palm-leaf. 13 Foll. 12½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

An anonymous commentary on Vararuci's Prākṛtaprakāśa. (Vice for complete copy R. No. 4389 of the Madras Govt. Oriental MSS. Library Catalogue.)

Contains the Paricchedas 1 and 2 only.

Beginning:

अखिलात्मगुणावासमज्ञानतिमिरापहम् ।
आश्रितानां सुशरणं वन्देऽनन्त . . . ॥
श्रियेऽस्तु वः श्रीर्जलदोदराभे
भुजान्तरे या भुवनैकभर्तुः ।
निष्टापनिर्णिक्तसुवर्णवर्णा
जम्बूनदीवाम्बुनिधौ विभाति ॥
भवः स भवतः पायादपायाद्यस्य जाह्नवी ।
भाति मूर्ध्नि जटा चूडाबद्धसूत्रमिव स्थिता ॥
प्राकृतसूत्रगणानां वाररुचानां मयाधुना क्रियते ।
वृत्तिः सरूपसिद्धिः संक्षिप्ताडम्बरेणेयम् ॥

आदेरतः । आदेरित्या परिच्छेदसमाप्तेरधिकारः । अत इति चाकारविधानात् । यदित ऊर्ध्वमनुक्रमिष्यामस्त-देरतः स्थाने भवतीति वेदितव्यम् । आ समृद्ध्यादिषु वा । समृद्ध्यादिषु शब्देषु आदेरतः स्थाने वा आकारादेशो भवति । समृद्धिः—समिद्धी सामिद्धी वा । स्वायुत्पत्तिः । समृद्ध स् इति स्थिते आ समृद्ध्यादिषु वेत्यनेन विकल्पेनाकारादेशः । इदृष्यादिष्विति ऋत इत्वम् । सुभि सुप्सु दीर्घ इति दीर्घः । अन्त्यहल इति सुलोपः ।

End:

स्नुषायां ह्नः । स्नुषाशब्दे स्नू इत्यस्य ह्न इत्यय-मादेशो भवति । स्नुषा ह्नुसा ।

Colophon:

इति प्राकृतप्रकाशे द्वितीयः परिच्छेदः ।
युक्तस्योपरि लोपः ।

731. 9. J. 20.

प्राकृतरूपावतारः—सिंहराजकृतः

Paper. 88 Foll. 8½ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A work on Prākṛta grammar based on Vālmīki's Prākṛtasūtras some of which are also quoted and explained herein. The author Siṁharāja was the son of Samudrabandhayajvan, the auther of the Alaṁkārasarvasvavyākhyā, published in the Trivandrum Sanskrit Series, No. 40. Samudrabandha is said to have flourished in the court of Rāmavarman (1265 A. D.) The author Siṁharāja was also the author of the Karpūramañjarīvyākhyā.

(Vide Pandit V. Krishnamacharya's Notes on the MS. of the Karpūramañjarī-vyākhyā, published in the Adyar Library Bulletin 1945, for further remarks.)

Complete.

Beginning:

अन्तरायान्धतमसविध्वंसनविभाकरम् ।
दैत्यपद्मोपमर्देन्दुं वन्दे करिमुखं महः ॥
उत्तराभिमुखा भक्ता यस्य वाचस्पतावपि ।
भजामि भागधेयं तं प्रसन्नं दक्षिणामुखम् ॥
सेतुं व्याख्यानरूपं गहनमकृत यः शास्त्रसाहित्यसिन्धो-
र्बुद्ध्या बुद्ध्वा यथार्थं व्यरचयत निजां सिन्धुबन्धेति संज्ञाम् ।
नत्वा यं यायजूकं निगमविधिविदं तातमस्य प्रसादाद्व्यक्तं
रूपावतारं विरचयति मितं सिंहराट् प्राकृतीयम् ॥

इह प्राकृतशब्दास्त्रिधा । संस्कृतसमाः संस्कृतभवा देश्याश्चेति । संस्कृतभवाश्च द्विधा । साध्यमानसंस्कृतभवाः सिद्धसंस्कृतभवाश्चेति । तत्र देश्यवर्जितत्रिविधप्राकृतशब्दविषयं प्राकृतव्याकरणमारब्धम् । भाषान्तरविषयत्वे सत्यपि प्रायिकत्वात् संकृतलक्षणप्रकृतिसंबन्धित्वस्य भाषान्तरेष्वपि विद्यमानत्वाद्वा प्राकृतव्याकरणमिति व्यवहारः । प्रक्रियांशस्य शास्त्रे व्याकीर्णत्वात्तत्सुखज्ञानार्थमस्माभिरयं प्राकृतरूपावतारः प्रस्तूयते । तत्रादौ शास्त्रीयसंव्यवहारज्ञापनार्थं संज्ञापरिभाषे वर्ण्यंते—सुप्स्वादिरन्त्यहला । स्वादिषु विभक्तिष्वादिवर्णो वचनं वा अन्त्यहला सह संज्ञा स्यात् ।

End:

अन्यादृशस्य अन्नाइरावराइसो । अन्यादृशस्य अन्नाइरा, वराइसो इति भवतः । अन्नाइरा, वराइसो । पस्सगृह्ही दृशिग्रहोः । पस्सदि गृह्णदि ।

Colophon:

इति सकलविद्याविशारदस्य समुद्रबन्धयज्वनः सूनुना सिंहराजनामधेयेन विरचिते प्राकृतरूपावतरे विद्याशौरसेन्यादिविभागः समाप्तः ।

732. 8. J. 461.

प्राकृतसूत्रम्—वाल्मीकिकृतम्

Paper. 160 Foll. $7\frac{3}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing. Written on one side of paper. Each page contains the title of the work as *Trivikramavṛttisiddhasūtrapāṭhaḥ* which would mean 'the reading of the Sūtras determined according to Trivikrama's vṛtti.'

The work is written in the sūtra form and gives the rules on grammar of Prākṛta language which is generally held to be a corruption of Sanskrit. It deals with the 6 kinds of Prākṛta language known as Mahārāṣṭrī, S'aurasenī, Māgadhī, Pais'ācī, Cūlikā and Apabhramśa. The authorship is attributed to a certain Vālmiki. However commentators on the work identify him with the famous author of the Rāmāyaṇa. The work is also known by the title *Vālmīkisūtra* after the author's name. Some critics opine that the work was written originally in verse and then the verses were split up into various sūtras by the commentator Trivikrama for adding his vṛtti to them. But this assertion does not seem to receive full support as some of the sūtras are not readable as verse when combined together.

As Trivikrama the commentator has been assigned to the 14th century A.D. our author Vālmīki should have lived earlier than the 14th century A.D. The work is divided into three adhyāyas each containing four pādas. The first adhyāya consists of 364 sūtras, the second 361 and the last 461. Thus the total number of sūtras according to this MS. is 1186. There is an edition of the work printed in Telugu character. According to that edition the total number of sūtras is 1086.

The MS. contains also the following works written in English script:

1. Alphabetical Index of the Prākrta-sūtras of Vararuci (pp. 1-18).
2. Alphabetical Index of the Prākrta-sūtras of Hemacandra (pp. 1-3).
3. Prākṛtasūtras of Hemacandra (the 8th chapter of his S'abdānus'āsana. pp. 1-61).
4. Alphabetical Index of the Prākṛta-sūtras of Vālmīki (styled as Trivikrama-sūtras pp. 1-10).
5. Vocabulary for Prākṛta words with their corresponding Sanskrit words (pp. 1-39).

Complete:

Beginning:

सिद्धिर्लोकाच्च । अनुक्तमन्यशब्दानुशासनवत् । संज्ञात्रत्याहारमयी वा । सुप्स्वादिरन्त्यहला । हो ह्रस्वः । दि दीर्घः । शषसाः शुः । सः समासः । आदिः खुः । गो गणपरः ।

End

गोली वेद्यामाज्ञायां च । कण्णो विश्राचंचौ अवतसे च । अलब्धिअङ्गदेजलार्द्रायां च । ओमारो नदीमध्यद्वीपे कमठे च । उब्भोमीतौ सद्भावे च ॥२०६॥

Colophon:

इति तृतीयाध्याये चतुर्थः पादः । समाप्तश्चाध्यायः ।

733. 8. J. 46$\frac{2}{.}$.

प्राकृतसूत्रम्—वाल्मीकिकृतम्

Paper. 33 Foll. 8½ × 6½ inches. 21 lines in a page. Devanāgarī script. Old. Good. Good writing.

Complete.

Two extra leaves added at the beginning read a portion of the work in duplicate. Tirivikramasūtra is the title of the work given in each page.

734. 8. J. 56.

प्राकृतसूत्रम्—वाल्मीकिकृतम्

Paper. 56 Foll. 7¾ × 6 inches. 25 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the sūtras arranged in alphabetical order. Trivikramasūtra is the title of the work given in each page.

Complete.

735. 8. J. 46$\frac{2}{.}$.

प्राकृतसूत्रवृत्तिः—त्रिविक्रमकृता

Paper. 76 Foll. 8½ × 6½ inches. 20 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a commentary on Vālmīki's Prākṛtasūtra by Trivikramadeva son of

Mallinātha and Lakṣmī and grandson of Ādityavarman of Bāṇa family. Trivikrama's brother Bhāma was also known with the title Vṛttavidyut. The author states that he collected the Prākṛta words from the works of Jinasena, Hemacandra and others and gave them as examples for the rules. He salutes S'rīvīra and describes himself as a disciple of Arhanandin. About the authorship of Trivikrama attention may be invited to the article by Prof. A. N. Upadhya, published in the journal of the Bhāratīya-Vidya-Bhavan, Bombay in May 1941.

Breaks off in the 1st pāda of the 3rd adhyāya.

Beginning :

श्रीवीरं प्राच्याचलसमुदितमखिलप्रकाशनं वन्दे ।
दिव्यध्वनिपटुदीधितिमहमक्षरपद्धतिप्राप्त्यै ॥ १ ॥
श्रुतभर्तुरर्हनन्दित्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीबाणसुकुलकमलद्युमणेरादित्यवर्मणः पौत्रः ॥ २ ॥
श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृताम्बुधिसुधांशुः ।
भामस्य वृत्तविद्युन्नाम्नो भ्राता त्रिविक्रमः सुकविः ॥३॥
श्रीवीरजिनसेनार्यादिवचःपयोनिधेः कतिचित् ।
प्राकृतपदरत्नानि प्रकृतिकृतीसुकृतिभूषणाय चिनोति ॥ ४
अनल्पार्थः सुखोच्चारः शब्दः साहित्यजीवितम् ।
वचः प्राकृतमेवेति मतं सूत्रानुवर्तिनाम् ॥ ५ ॥
प्राकृतं तत्समं देश्यं तद्भवं चेत्यदस्त्रिधा ।
तत्समं संस्कृतसमं ज्ञेयं संस्कृतलक्षणात् ॥ ६ ॥
देश्यमार्षं च रूढत्वात्स्वतन्त्रत्वाच्च भूयसा ।
लक्ष्म नापेक्ष्यते तस्य संप्रदायो हि बोधकः ॥ ७ ॥
प्रकृतेः संस्कृतात्साध्यमानात्सिद्धाच्च यद्भवेत् ।
प्राकृतस्यास्य लक्ष्यानुरोधि लक्ष्म प्रचक्ष्महे ॥ ८ ॥
प्राकृतपदार्थसार्थप्राप्त्यै निजसूत्रमार्गमनुगमिता ।
वृत्तिर्यथार्थसिद्ध्यै त्रिविक्रमेणागमात्क्रियते ॥ ९ ॥
तद्भवतत्समदेश्यप्राकृतरूपाणि पश्यतां विदुषाम् ।
दर्पणतयेयमवनौ वृत्तिस्त्रैविक्रमी जयति ॥ १० ॥
प्राकृतरूपाणि यथा प्राच्यैरा हेमचन्द्राचार्यात् ।
विवृतानि यथा तानि प्रतिबिम्बन्तीह सर्वाणि ॥ ११ ॥

सिद्धिर्लोकाच्च । सिद्धिरिह प्रस्तुतप्राकृतशब्दसंबन्धिनी परिगृह्यते । सा च लोकाद्भवति । यस्मात् ऋलृवर्णाभ्यामैकारौकाराभ्यामसंयुक्तङञकाराभ्यां द्विवचनाक्षरेण विरहितः शब्दोच्चारो लोकव्यवहारादेव लभ्यते, तस्मात् सिद्धिर्लोकादिति वेदतव्यम् । चकाराद्वक्ष्यमाणादनेकान्ताच्च ॥ १ ॥ अनुक्तमन्यशब्दानुशासनवत् । यदिह स्वरादिसंज्ञात्वेन संधिप्रभृतिकार्यत्वेन चानुक्तं तदन्यशब्दानुशासवत् कौमारजैनेन्द्रपाणिनीयप्रभृतिषु यथोक्तं तथैव वेदितव्यम् ।

End :

डिप्पणिड्डुहौ विगलेः । विपूर्वस्य गलतेः डिप्प, णिड्डुह इत्यादेशौ तु भवतः । डिप्पइ । णिड्डुहइ । विगलइ ॥ १०१ ॥

736. 54. A. 13.

प्राकृतसूत्रवृत्तिः—त्रिविक्रमकृता

Paper. 21 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. Old. New. Good writing.

Contains the first pāda of the first adhyāya.

Reads the following colophon.

इति श्रीमदर्हनन्दित्रैविद्यश्रुतधरमुनिचन्द्रप्रसादासादितसमस्तविद्याप्रभावत्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ प्रथमाध्यायस्य प्रथमपादः समाप्तः ।

737. 8. J. 20.

प्राकृतसूत्रवृत्तिः—त्रिविक्रमकृता

Paper. 57 Foll. 8 × 6½ inches. 20 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are bound in disorder.

The codex contains only the variation of readings in Trivikrama's vṛtti, found in comparison with the MS. belonging to one Vis'ves'varas'āstrin of Bangalore.

738. 8. H. 25.

प्राकृतसूत्रवृत्तिः—त्रिविक्रमकृता

Paper. 84 Foll. 15 × 6¼ inches. 13 lines in a page. Telugu script. Old. Much injured. Legible writing.

Complete in 3 adhyāyas.

Reads the following end and colophon:

End:

सुरा इत्यादयः शब्दास्तद्भवतत्समवर्तमानाः प्रयोग-पदवीमासादयन्ति । सिद्ध इति पदं मङ्गलार्थम् ।

Colophon:

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादा-सादितसमस्तविद्याप्रभावश्रीमत्त्रिविक्रमदेवविरचितप्रा-कृतव्याकरणवृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः ।

Then reads the following stanzas:

सप्रत्ययप्रकृतिसिद्धमदीर्घसूत्रं
सत्कारकं बहुविधक्रियमौपदेश्यम् ।
शब्दानुशासनमिदं प्रगुणप्रयोगं
त्रैविक्रमं भजत मन्त्रमिवार्थसिध्यै ॥
विशन्नन्तःश्रोत्रं पदमधुरिमा मेदुरयति
प्रणितो नूत्नोऽर्थः प्रतिपदमहो साधुवचनम् ।
रसः पात्रीकुर्याद्भुवनमनुभावादिव कृते-
र्यदि श्राव्यं काव्यं मम रसिकवर्यैर्बुधजनैः ॥
वक्तारः सन्तु सर्वेऽपि स्वाभिप्रायप्रकाशने ।
स पराशयसंवादी कथास्वेकस्त्रिविक्रमः ॥

739. 8. J. 46[1].

प्राकृतसूत्रम्—हेमचन्द्राचार्यकृतम्

Paper. 61 Foll. 7¾ × 6½ inches. 20 lines in a page. English script. Old. Good. Good writing.

This is the 8th chapter of the S'abdānus'āsana of Hemacandrācārya, dealing with the grammar on Prākṛta Language. The author is said to be the pupil of Devacandra, and teacher of Kumārapāla. He is said to have born in 1088 A.D. and died in 1175. A.D.

Complete:

Beginning:

अथ प्राकृतम् । बहुलम् । आर्षम् । दीर्घह्रस्वौ मिथो वृत्तौ । पदयोः संधिर्वा । न युवर्णस्थास्वे । एदोतोः स्वरे । स्वरस्योद्वृत्ते । त्यादेः । लुक् । अन्त्यव्यञ्जनस्य । न श्रुदुदोः । निर्दुरोर्वा ।

End:

लिङ्गमतन्त्रम् । शौरसेनीवत् । व्यत्ययश्च । शेषं संस्कृतवत्सिद्धम् ।

Colophon:

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्रा-भिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः । अष्टमोऽध्यायः समाप्तः ।

This MS. contains also an alphabetical index of the sūtras.

740. 9. E. 75.

षड्भाषाचन्द्रिका—लक्ष्मीधरकृता

Paper. 117 Foll. 12 × 3⅜ inches. 10 lines in a page. Telugu script. Old. Much injured. Clear writing.

A treatise on Prākṛta grammar dealing with the six varieties of Prākṛta dialects namely Māhārāṣṭri, Māgadhī, S'aurasenī. Pais'ācī, Cūlikāpais'ācī and Apabhraṁs'a. The author in the course of treatise incidentally comments upon Vālmīkisūtras and Trivikrama's Vṛtti thereon. The author Laksmīdhara was the son of Yajñes'varbhaṭta and Sarvāmbikā and grandson of Timmayasomayājin of Carakuri family. He was the native of a village situated on the bank of Kṛṣṇā river. His elder brother and preceptor was Koṇḍubhaṭṭopādhyāya. Lakṣmīdhara is known to have written the following works: 1. Prasannarāghavavyākyā Timmabhūpālīya (1580 A.D.). 2. Gītagōvindavyākyā S'rutirañjanī (1580 A.D.), 3. Anargarāghavavyākhyā. Iṣṭārthakalpavallī. In the last wôrk he states that he became saṁnyāsin with the name Rāmānanda under Kṛṣṇānandayati. It is said that each of the 9 syllables of a mantra (Dakṣiṇāmūrti mantra ?) is included in certain stanzas of the work. The printed editions of this work read some extra stanzas in the beginning.

Complete.

Beginning:

ओंकारार्थाय विज्ञानदायिने लोकसाक्षिणे ।
करुणामयवीक्षाय दक्षिणामूर्तये नमः ॥
वीसद्धं कुणिअसराइरहसाणीसासणुण्णं छिद्दा
पुव्वं दिट्ठमहोक्खरण समिअसेअंबु एक्कत्थळे ।
आळोळामळहारकुण्डळपहाकिम्मीरकुप्पा सअं
ळच्छीए थणमण्डळं हवउ दे इट्ठद्दाणुं मुहं ॥
विस्रब्धं कृतस्मराजिरभसनिःश्वासनुन्नं स्पृहा-
पूर्वं दृष्टमधोक्षजेन शमितस्वेदाम्बवेकस्थले ।
आलोलामलहारकुण्डलप्रभाकिम्मीरकूर्पासकं
लक्ष्म्याः स्तनमण्डलं भवतु ते इष्टार्थदानोन्मुखम् ॥
वेहिं वेहिं अ त्थणे हत्थेहिं गण्डजुम्ममज्जाए ।
घेत्तूण चुंबमाणो अहरं णे पाउ कामओ देओ ॥
द्वाभ्यां द्वाभ्यां च स्तनौ हस्ताभ्यां गण्डयुग्ममार्यायाः ।
गृहीत्वा चुम्बमानः अधरं नः पातु कामदो देवः ॥
कुणिअहरधणुद्दभंगे जणअसुआसंतकमळिणीमित्ते ।
चिट्ठउ विहरउ संते रहुणाहे मह मणो णिच्चं ॥
कृतहरधनुर्भङ्गे जनकसुतास्वान्तकमलिनीमित्रे ।
तिष्ठतु विहरतु शान्ते रघुनाथे मम मनो नित्यम् ॥
लक्ष्मीधराख्यविदुषा षड्भाषाचन्द्रिकानवा ।
विद्वत्कविचकोराणां प्रीतये क्रियतेऽधुना ॥
वाग्देवी जननी येषां वाल्मीकिर्मूलसूत्रकृत् ।
भाषाप्रयोगा ज्ञेयास्ते षड्भाषाचन्द्रिकाध्वना ॥

अथेदानीं परिभाषाणां स्वरूपं विनियोगश्च कथ्यते—

भाषा द्विधा संस्कृता च प्राकृता चेति भेदतः ।
कौमारपाणिनीयादिसंस्कृता संस्कृता मता ॥
इयं तु देवतादीनां मुनीनां नायकस्य च ।
विप्रक्षत्रवणिक्छूद्रमन्त्रिकञ्चुकिनामपि ॥
लिङ्गिनां च विटादीनामनीचानां प्रयुज्यते ।
प्रकृतेः संस्कृतायास्तु विकृतिः प्राकृती मता ॥
षड्विधा सा प्राकृती च शौरसेनी च मागधी ।
पैशाची चूलिकापैशाच्यपभ्रंश इति क्रमात् ॥

* * * *

सिद्धिर्लोकाच्च । सिद्धिरिह प्रस्तुता प्राकृतशास्त्रसंबन्धिनी गृह्यते । सा च लोकाद्भवति । यस्मात् ऋलृवर्णाभ्यां शषाभ्यामैकारौकाराभ्यामसंयुक्तङञकाराभ्यां द्विवचनाच्च विरहितः प्रयोगो लोके दृश्यते तस्मात्सिद्धिर्लोकादिति ज्ञेयम् । चकाराद्वक्ष्यमाणलक्षणाच्च ।

End:

तक्षेश्चोल्लः । 'तक्षू तनूकरणे' इत्यस्य चोल्ल इत्यादेशः स्यात् । चोल्लइ, चोल्लदि । शेषाश्च धात्वादेशा भावकर्मगोर्धात्वादेशाः प्रत्ययाश्च सर्वे प्राकृतवदवगन्तव्याः ।

नवाक्षरीमहामन्त्रवर्णादिश्लोकगर्भितम् ।
इमं प्रबन्धं विबुधः पठन् वाक्सिद्धिमाप्नुयात् ॥

Colophon:

इति श्रीमदखिलविद्यापरिवाढ्दक्षिणामूर्तिमहादेवप्रसादलब्धविद्यपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकूरियज्ञेश्वरभट्टोपाध्यायतनयकोण्डुभट्टोपाध्यायशिष्येण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना सर्वविद्वत्कविसंमतेन दक्षिणामूर्तिमहादेवकिङ्करेण लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकायामपभ्रंशविभागः । समाप्तो ग्रन्थः ।

741. 8. H. 37.

षड्भाषाचन्द्रिका—लक्ष्मीधरकृता

Paper. 32 Foll. 8 × 6½ inches. 17 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Subanta and Tiṅanta portions incomplete.

742. 39. C. 2.

षड्भाषाविवरणम्—बालसरस्वतीकृतम्

Paper. 74 Foll. 8¼ × 8½ inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a treatise on grammar of Prākṛta dialect of six kinds as dealt with in the Prākṛtasūtras of Vālmīki. The author Bālasarasvatī was the son of Kṛṣṇa and grandson of Bhairava of Yelakūci family. The following Telugu works also are known to have been written by the author: (1) Bālasarasvatīyamu, (2) Kaumudīnāṭakamu, (3) Bāhaṭamu, (4) Candrikāpariṇayamu, (5) Vāmanapurāṇamu, (6) Bhramaragītāprabandhamu, and (7) Yādavarāghavapāṇḍavīyamu. The first of these works, is a commentary on the Āndhraśabdacintāmaṇi of Nannayabhaṭṭa. The author states therein that his real name was Veṅkaṭakṛṣṇa and the name Bālasarasvatī was only the title borne by him. He also states that he and his ancestors were inhabitants of the village Eḍappalli donated by Aliya Rāmarāya son of Tirumala Rāya of Vijayanagar. (1550 A.D.). (Vide No. 248 of the Descriptive Catalogue of Telugu MSS. in the Government Oriental MSS. Library, Madras). He mentions Trivikrama and Hemacandra. As he quotes Rāmacandrāśrama's Siddhāntacandrikā he must have belonged to a later period.

Complete:

Beginning:

चतुर्मुखमुखाम्भोजसुखक्रीडितरागिणी ।
वाणी यमभिशेते स्म तस्मै वाल्मीकये नमः ॥१॥
कविसंज्ञा पुरा यस्मादजनिष्ट जगत्त्रये ।

काव्यानि यदुपज्ञानि तस्मै वाल्मीकये नमः ॥२॥
वाल्मीकिं सूत्रकारं च वृत्तिकारं त्रिविक्रमम् ।
वन्दामहे महाचार्यान् हेमचन्द्रादिकानपि ॥ ३ ॥
तातपादं गुरुं देवं तान्महाकविनायकान् ।
कृष्णदेवान्नमस्यामि ब्रह्मविद्यागुरून्सताम् ॥ ४ ॥
यलकूचिकृष्णदेवप्रथमसुतो भैरवस्य यः पौत्रः ।
बालसरस्वत्यार्यः षड्भाषाविवरणं समातनुते ॥५॥
प्रागर्वागुपरि प्रभूतकविराड्बृन्दानुहार्यस्ववा-
ग्जालो बालसरस्वतीकविमहोपाध्यायभट्टारकः ।
संगृह्य प्रथमागमानमुगमांस्त्रिविक्रमादीनिदं
बालानुग्रहकाम्यया रचयति प्रख्याप्यतां सज्जनैः ॥६॥

सिद्धिर्लोकाच्च । प्राकृतभाषासिद्धिः लोकव्यवहात्-ज्ञेया स्यात् । चकाराल्लक्षणाच्च । परस्मैपदात्मने-पदनियमाद्यभावादिर्लोकव्यवहारगम्यः । त्रिविधा प्राकृतभाषा—देश्या, तद्भवा, तत्समा चेति । ताम्रस्य तम्बरः, आम्रस्य अम्बर इत्यादयो देश्याः शब्दाः । तत्समा संस्कृतसमा—अहो हे हि अहहेत्यादयः । तद्भवा संस्कृतजा। सा च सकलभाषानिदानात् संस्कृतात् सिद्धावस्थयां साध्यावस्थयां च जायमानत्वात् सिद्धा साध्या चेति द्विविधा । तत्स्वरूपं यथास्थानं दर्शयिष्यामः । अनुक्तमन्यशब्दानुशासनवत् । अत्याकाङ्क्षणीयं । यदनुक्तमपि पाणिनीयशास्त्रानुसारेण ज्ञेयं स्यात् । अत एवात्रापि प्रत्याहारादिव्यवहारः । अत्र चत्वारिंशदक्षराण्येव व्यवहार्याणि । यथा—ऐकारौकारऋॠऌवर्णशषक्षकारा न स्युः ।

End:

प्राकृतं षड्विधं चापि भारत्या बालभाषितम् ।
भाषाणां प्राकृतादीनां वाल्मीकिर्मूलसूत्रकृत् ॥
विनाभिज्ञानमेतेषां दुर्ज्ञेयं नाटकादिकम् ।
अनुग्रहेण बालेषु सर्वं संकुचितं मया ॥

ननु प्राकृतभाषानुपादेया, अपभ्रंशत्वात् गावीगोण्यादिशब्दवत् । उपादाने म्लेच्छत्वप्रसङ्गः । शिष्टानिबद्धविरलदेशभाषात्वमपभ्रंशत्वम्, हम्मति-रम्मत्यादीनां विरलदेशभाषात्वेऽपिशिष्टनिबद्धत्वान्नापभ्रंशत्वम्। नाट्यविषयज्ञण्णा किणादिशब्दानां शिष्टानिबद्धत्वेऽपि नापभ्रंशत्वम्। प्राकृतं त्वपभ्रंशः, अतो न ग्राह्यमिति चेन्न। भगवता वाल्मीकिना निबद्धलक्षणं सर्वदेशप्रसिद्धव्यामिश्रकोपकारि प्राकृतं नापभ्रंशः संस्कृततुल्यमेव । अन्यथा नाटकेऽप्यपभ्रंशस्यानुपादेयत्वप्रसङ्गः ।

Colophon:

इति श्रीसकलसुकविमहोपाध्यायभट्टारकबालसरस्वतीकृते षड्भाषाविवरणे सर्वं संपूर्णम् ।

(*d*) MISCELLANEOUS

743. 22. A. 36.

अथर्वणकारिकाः

Palm-leaf. 6 Foll. 18 × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

A brief work written in Sanskrit on Telugu grammar by an anonymous author. It is written in verse. The first page of the MS. mentions the title of the work as Atharvaṇakārikālu. The work is different from the Atharvaṇakārikā also called Vikṛtiviveka attributed to Atharvaṇācārya (vide R. No. 405 of the Catalogue of Telugu MSS. in the Government Oriental MSS. Library Madras) and from the Triliṅgaśabdānuśāsana of the same author. If the word Pūjyapāda in the last stanza of this work is taken to denote Akalaṅkadeva the author of Karṇāṭakaśabdānuśāsana, our author may be fixed in the last part of the 17th century A.D. (Vide Vireśalingam Pantulu's Āndhrakavulacaritramu, page 260, part I, 1917).

Complete.

Beginning :

अध्यामहार्हसो मूलं सर्वस्येति निगद्यते ।
तदनुक्तस्य कार्यस्य वक्ता भवति पाणिनिः ॥
वर्णलोपागमस्यैके सर्वस्मिंस्तद्भवे पदे ।
भिन्नत्वयुक्तवर्णस्य लोपादेशागमास्तथा ॥
तद्भवं संस्कृती ये स्युरादेशाद्यास्तदन्यतः ।
वर्णस्य व्यत्ययश्च कुत्रचित्कविसंमतः ॥
प्राकृते तद्भवे चापि चजौ दन्तभवौ स्मृतौ ।
अहेयमन्यदेशीयं यत्तदेव प्रयुज्यते ॥
स खण्डः प्रथमान्ध्रः स्याद्वैकृतेऽत्र कदापि च ।
तृतीये प्रथमे वर्णे पर एव हि दृश्यते ॥
बिन्दुर्वैकृतमध्येऽत्र नान्यवर्णे परे तु सः ।
संयुक्ते संस्कृताद्ये स्यात्सर्वमान्ध्रपदं लघु ॥
भवेदाद्यसमासेऽपि उभयोर्यत्पदं तथा ।
परेऽपि च तथात्वं स्यात्क्वचिन्नैव न रेफयोः ॥

End :

भाषेयममिता तत्र देश्या चित्रस्वभावयुक् ।
तच्चित्रता तु द्रष्टव्या पूज्यपादसुभाषिते ॥

744. 30. J. 26.

आन्ध्रशब्दचिन्तामणिः—नन्नयभट्टकृतः, सवृत्तिः

Palm-leaf. 14 Foll. 17 × 1½ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The Āndhraśabdacintamaṇi is a treatise on Telugu grammar. The work is written in Sanskrit and contains 90 stanzas in āryā metre divided into 274

sūtras or rules. The author Nannayabhaṭṭa is considered as the first among the Telugu authors and poets. From the Āndhrakavulacaritramu by Rao Bahadur K. Viresalingam Pantulu, it is understood that the author belonged to Mudgala-Gotra and Vengināṭi family and was the court Pandit of the Cālukya King Rājarājendra (1022-1063 A.D.) He is also known to have written the following other works: (1) Āndhramahābhāratamu, (2) Rāghavābhyudayamu and (3) Caṇḍikāvilāsamu. The Āndhraśabdacintāmaṇi has become so popular in the country as to attract many authors to write on it commentaries such as Bālasarasvatīyamu, Vāsudevavṛtti, Ahobalapaṇḍitīyamu, Nṛsiṁhapaṇḍitīyamu. In the MS. the rules are followed by a vṛtti in Sanskrit by an anonymous author. The work is divided into five chapters, *namely*: (1) Saṁjñāpariccheda, (2) Sandhipariccheda, (3) Ajantapariccheda, (4) Halantapariccheda and (5) Kriyāpariccheda. The author opines that the Telugu language is originated form Prākṛta which is derived from Sanskrit and designates Sanskrit as Ādiprakṛti. The work has been described in No. 1238 of the Descriptive Catalogue of Telugu MSS. in the Gevernment Oriental MSS. Library, Madras and the Telugu note added therein states that the authorship of Nannayabhaṭṭa is not fully believable as the rules found herein are inconsistent with those of the Bhāratabhāṣāvyākaraṇamu of the same author. Bālasarasvatī, in his commentary on the work, mentions the author with the title *Bhāṣāvāganuśāsanācārya.*

Contains paricchedas 1—3 only.

Beginning:

नत्वा सरस्वतीं देवीं ग्रन्थानालोक्य भूरिशः ।
आन्ध्रलक्षणसूत्राणां वृत्तिरेषा विरच्यते ॥

सू० विश्वश्रेयः काव्यम् ॥

कवयते वर्णयतीति कविः । तस्य कर्म काव्यम् । पङ्कजादिवत् योगरूढत्वात् । रसोल्लसितशब्दार्थघटनार्थकमेव, न कर्ममात्रम् । तत्काव्यं कीर्त्यादिसमस्तश्रेयःसाधनं भवति । साध्योपलक्षणया अव्यभिचारेण कार्यनिष्पादकत्वं ध्वनितम् ॥

सू० तददोषौ परिष्कृतौ च वार्थौ ॥

दोषरहितौ गुणालंकारसामग्रीसहितौ च शब्दार्थौ तत्काव्यम् ॥

सू० सा वाग्वा रसवृत्तिः ॥

चर्व्यमाणतां प्राप्तस्य शृङ्गारादेः व्यापाररूपा या सैव काव्योचिता वाग्भवति ॥

सू० साध्यो हि रसो यथातथं कविभिः ॥

कविभिर्यथास्वभावं यथात्मीयं वा शृङ्गारादिरसः साध्यो हि । हीति प्रसिद्धौ ॥

सू०

स्वस्थानवेषभाषाभिमताः सन्तो रसप्रलुब्धधियः ।
लोके बहुमन्यन्ते वैकृतकाव्यानि चान्यदपहाय ॥

रससाधनैकप्रवणाः कवयः स्वदेशीये ये वेषभाषे तयोरभिमानिनः सन्तः अन्यदेशभाषामयं काव्यं परित्यज्य लोके वैकृतकाव्यानि च बहुमन्यन्ते । चकारात् संस्कृतकाव्यानि बहुकरणपूर्वकं कुर्वन्त्येव ।

End:

सू० क्लीबसमा आमहद्वत् ॥

नपुंसकसमाः क्लीबतुल्याः स्युः । अन्दमु । चन्दमु । गुर्रमु ।

सू० स्त्रीवत्स्युः स्त्रीसमाः ।

स्त्रीलिङ्गतुल्या भवन्ति । गोड । मेड । बावि । मोवि ॥

सू० समास्तु समाः ॥

समास्तु प्रकृतद्वयतुल्या भवन्ति । सीत । रघुकुलमु । जयिडु । जडकारमु ॥

Colophon:

इत्यान्ध्रशब्दचिन्तामणिवृत्तौ तृतीयोऽजन्तपरिच्छेदः ॥

745. 29. M. 22.

आन्ध्रशब्दचिन्तामणिव्याख्या—अहोबलपण्डितकृता

Palm-leaf. 137 Foll. 16 X 1¾ inches. 7 lines in a page. Telugu script. Old. Very much injured. Legible writing.

This is a commentary on the Āndhraśabdacintāmaṇi of Nannayabhaṭṭa, by Ahobalapaṇḍita disciple of Pōlūri Mādhavayajvan. The author belonged to Prabhañjana family and is said to have borne the titles Abhinava-Nannayabhaṭṭa and Abhinavaśabdānuśāsana. The commentary is called Kaviśirobhūṣaṇa in the colophon, but generally known as Ahobalapaṇḍitīyamu.

Wants beginning in the 1st pariccheda and breaks off in the 5th pariccheda with gaps in the middle.

Beginning:

. . . . . श्वेतनीलयोरेकत्वाङ्गीकारान्न दोषः । ककारस्य क्षत्रियजातिः, आचार्यस्य विप्रजातिरिति यद्यपि जात्योरैक्यं न, तथापि पर्यायियोगोऽपि न दोषायेत्याचार्याशयः । पर्याययोगो नातीव दोष इत्युक्तेः । नकारादिक्रमेण गणनायां वकारस्य साध्यसिद्धत्वेन अरिचक्रशोधनमपि कृतमाचार्येण । आचार्यताराया अनूराधाया अक्षरताराया रोहिण्याश्च गणविरोधः, आदित्यनरयोर्योगे गणं मध्यममुच्यते इत्युक्तेः । तद्वदेवादित्यगणत्वं रोहिण्याः नृगणत्वमनूराधायाः प्रसिद्धम् ।

* * * * *

Colophon:

इति श्रीरामचरणारविन्दमिलिन्दान्तःकरणेन श्रीत्पोलूरिमाधवयज्वचन्द्रसमुज्ज्वलत्कृपाकटाक्षासादितसाधुपाण्डित्याभरणेन प्रभञ्जनवंशाब्धिराकाशशाङ्केन निरन्तराराधितविचक्षणशशाङ्केन अभिनवनन्नयभट्टाचार्येण अहोबलपत्याचार्येण विरचितायामान्ध्रशब्दचिन्तामणिव्याकरणव्याख्यायां कविशिरोभूषणाख्यायां प्रथमः संज्ञापरिच्छेदः ।

End:

शेषं तु ज्ञेयं शिष्टप्रयोगत इत्युक्तं भाष्यादिष्वपि । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येत्यादिना प्रयोगानुसारित्वं बहुधा प्रतिपादितमिति सर्वमतीव शुभम् ।

हंसीव वसतादन्तर्वाणिहंससुमानसे ।
सेयं कविशिरोभूषा दूषणारेः प्रसादतः ॥
तुष्टो . . . . . वसत्कृपावा-
नेतन्मदीयवचनैरपि दुष्टबाधैः ।
हृष्टो भवेद्धि सुतला . . वासे
लोके पिता निजशिशोर्वचनैरपार्थैः ॥

मत्प्राणबन्धौ करुणैकसिन्धौ

श्रीरामचन्द्रे प्रहितार्धचन्द्रे ।

लग्ना कृतिः सेयमशेषकालं

लोके वरिष्ठां लभतां प्रतिष्ठाम् ॥

श्रीरामाय समस्तदैवतशिखारत्नाय ते मङ्गलं

घोराघौघच्छिदापटिष्ठमहिताख्याकाय ते मङ्गलम् ।

पारातीतसमस्तसद्गुणगणाधाराय ते मङ्गलं

धीरायोद्धृतचन्द्रशेखरधनुःसाराय ते मङ्गलम् ॥

दुष्टेन्द्रारिसमूहनीरदमहा . . . . लं

पुष्टाराध्यनुजन्मपङ्कजसुहृज्जाताय ते मङ्गलम् ।

इष्टार्थप्रदचातुरी . . . . . सीताय ते मङ्गलं

शिष्टानुग्रहकाम्यया द . . . . मङ्गलम् ॥

* * * * * *

Colophon :

इति . . . . श्रीमत्पोल्लूरिमाधवयज्वपण्डिताखण्डलसमुज्ज्वलत्कृपासारसंधुक्षितकटाक्षासादित . . . राकाशशाङ्केन निरन्तराराधितविचक्षणशशाङ्केन अभिनवशब्दानुशासनबिरुदाभिधानवता अहोबलपति . . . . व्याख्यायां कविशिरोभूषणाख्यायां पञ्चमः क्रियापरिच्छेदः समाप्तः ।

746. 26. G. 28.

त्रिलिङ्गशब्दानुशासनम् —अथर्वणाचार्यकृतम्

Palm-leaf. 4 Foll. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page, Telugu script. Old. Much injured. Good writing.

This is a metrical work in Sanskrit on Telugu grammar by Atharvaṇācārya who is said to have borne the title Catuṣṣaṣṭikalādhurya. The title S'abdānus'āsana seems to have been borrowed by this author from ancient writers like Patañjali, S'ākaṭāyana, Hemacandra, Akalaṅkadeva and others. This work is generally spoken as one of the two works on grammar written by Atharvaṇācārya, the other being the Vikṛtiviveka' or Atharvaṇakārikā. But Rao Bahadur K. Viresalingam Pantulu denies the authorship of Atharvaṇācārya in respect of the Vikrtiviveka. As the author mentions Hemachandra, the work may be assigned to a period later than the 12th century A.D. The work is divided into ten chapters.

Complete.

Beginning :

. . . . . विख्यातश्चोभयोः ।

. . . . चतुर्वेदविदां वरः ॥

करोमि शब्दं शब्दानां त्रिलिङ्गानां सल . . ।

नानाविधप्रयोगांश्च ज्ञात्वा विविधफक्किकान् ॥

आन्ध्रसंस्कृतमर्यादाभिज्ञैः साधु विचारितान् ।

करोम्याथर्वणं शब्दं सर्वलक्षणलक्षितम् ॥

ज्ञात्वा बहूनि बहुषु . . . . . ।

. . . न्द्रादिमुनिभिः कथितं सान्ध्रलक्षणम् ॥

अथ वक्ष्यामि सूत्राणि प्रयोगानुसरेण वै ।

रामादि प्रातिपदिकं नामेति च निगद्यते ॥

कनिविन्यादयः सर्वे धातवश्च . . ।

. . . क्रियाः स्युः संज्ञा ज्ञेया बुधेश्वरैः ।

अकारादिस्वराः प्राणाः कादयः प्रणिनो हलः ।

प्राणाः सप्त स्वरूपेण विश्रुताः प्राणिनः परे ॥

End :

बालानामृजुबोधार्थं संग्रहः कृतमेव हि ।

एवं धातोः प्रत्ययस्तु कर्तव्यः सानुबन्धकः ॥

Colophon :

इति चतुःषष्टिकलाधुर्याथर्वणाचार्यविरचिते त्रिलिङ्गशब्दानुशासने दशमः काण्डः ।

2. PROSODY

747. 23. G. 45.

नृसिंहवृत्तमाला—विरूपाक्षयज्वकृता

Palm-leaf. 41 Foll. 15¾ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The last leaf is much broken.

A work on prosody giving the characteristics with illustrations of various metres in Sanskrit. The illustrations are written in praise of God Nṛsiṁha and hence the work seems to have been called Nṛsiṁhavṛttamālā. The author Virūpākṣayajvan was the son of Rāmacandrādhvarin of Maudgalyagotra of Caṅgama village. He is the same as the author of the Candrālokavyākhyā S'āradas'arvarī (Vide No. 5221 of the Descriptive Catalogue of Sanskrit MSS. in the Tanjore Palace Library, Vol. IX). The author mentions herein S'rīnātha's Vṛttaratnākaravyākhyā and Dāmodara's Vāṇībhūṣaṇa (written earlier than 1676 A.D.). The work deals with the following subjects: Samavṛtta, Viṣamavṛtta, Mātrāchandas, Āndhrabhāsāchandas, Prastāra and Varṇaphalādi in 600 verses.

Complete.

Beginning:

वन्दे वन्दारूणां मन्दारं शैलनन्दिनीसूनुम् ।
निःसंदेहश्छन्दोबृन्दे यद्वन्दनेन मन्दोऽपि ॥
गतौ मन्दाक्रान्ता सितदशनपङ्क्तौ शिखरिणी
नितम्बे पृथ्वी सा नयनरुचिं दृग्युग्मविपुला ।
कचे स्रग्विण्यच्छस्फटिकमणिमाला करतले
महेन्द्राद्याराध्या मम वसतु वक्त्रे विधिवधूः ॥
मयरसतजभनगणा भूजलशुचिपवनखेनशशिनाकाः ।
गुरुलघुभेदोनयुतो भावाद्यन्तमक्षरं जयति ॥
मौद्गल्यगोत्रः पुरि चंगमायां श्रीरामचन्द्रोऽभवदध्वरीन्द्रः।
तस्यात्मजः श्रीनरसिंहवृत्तमालां विरूपाक्षसुधीर्विधत्ते ॥
उक्तात्युक्ता मध्या ततः प्रतिष्ठा च सुप्रतिष्ठा च ।
गायत्र्युष्णिगनुष्टुब् बृहती पङ्क्ती ततस्त्रिष्टुप् ॥
जगती ततोऽतिजगती शक्वर्यतिशक्वरी तथाष्टिश्च ।
अत्यष्टिर्धृत्यतिधृती प्रकृतिस्तथा कृतिर्विकृतिः ॥

* * * * * *

उक्तायां श्रीवृत्तं गौरौ त्वां श्रीरिति श्रीमन् ।
गङ्गा कन्या लक्ष्मीः श्रीते इति श्रीर्द्वितीयायाम् ।
नारीं मृगीं च मध्यच्छन्दसि रमणं च नरहरे वच्मि ।
कन्यां सह तरणिजया मन्मथनामप्रतिष्ठायाम् ॥

Colophon:

इति श्रीमौद्गल्यरामचन्द्राध्वरीन्द्रनन्दनविरूपाक्षयज्वकृतायां नरसिंहवृत्तमालायां समवृत्ताधिकारः ।

End :

वाक् त.स्य भवति वश्या फलति च सर्वकामधेनुरिव ।
नरसिंहवृत्तमाला कण्ठे यस्य . . . कटाक्षाणाम् ॥
श्रीहरिचरणयोगादादरणीया कृतिर्ममेयं स्यात् ।
न खलु गुण . . . . ॥
षड्भिः शतैर्विरचिता श्लोकानां वृत्तमालिका हि मया ।
आचन्द्रतारकमियं . . . . . . ॥

Colophon :

इति श्रीमौद्गल्यरामचन्द्राध्वरीन्द्रनन्दनश्रीविरूपाक्षयज्वकृता नृसिंहवृत्तमालि . . . ।

श्रीनृसिंहवृत्तमालिकासंपूर्णा ।

748. 19. L. 50.

प्रस्तारशेखरः—श्रीनिवासकृतः

Palm-leaf. 10 Foll. 15 × 1½ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a metrical treatise on Sanskrit metres by S'rinivāsa son of Lakṣmī and Veṅkaṭa. The author belonged to Kaus'ikagotra and Vājasaneyas'ākha of the S'uklayajus. He is also known to have written the following other works—(1) Sumanorañjana, (2) S'rinivāsacampū, (3) Vaijayantī, (4) Vṛttamaṇikos'a, (5) Saprakāratārāvali, (6) Hariharastuti and (7) Lokoktis'atakadvaya. Of these Nos. 1 to 4 are described under Nos. 3856, 4161, 5048 and 5088 respectively in the Descriptive Catalogue of Sanskrit MSS. in the Tanjore Library; Nos. 4 to 6 are printed and published in the Vāṇi Vilāsa Press, Srirangam and No. 7 is kept in MS. by Pandit K. Ramachandra Sarma of the Adyar Library. The Prastāras'ekhara specially deals with the science of prosody explaining its development by the way of calculation of mātrās and varṇas by permutation and combination. This kind of calculation is technically called Prastāra in the science of Sanskritic prosody. The work is divided into following six chapters—(1) Varṇaprastāra, (2) Mātrāprastāra, (3) Anuṣṭupprastāra, (4) Āryāprastāra, (5) S'abdaprastāra and (6) Svaraprastāra.

The MS. contains chapters 1 to 6 complete.

Beginning :

ऋषयो हि त्रिकालज्ञाः प्रस्तारांस्तपसा न्यधुः ।
अल्पधीः किं विधास्येऽहं हृदिस्थो वक्ति मे हरिः ॥१॥
अमृतं सिन्धुमथनजं दत्तं येनैव भुञ्जते देवाः ।
प्रस्ताराब्धिमथनजं स मम हृदिस्थो ददातु विद्वद्भ्यः ॥
लक्ष्मीवेङ्कटनाम्नोस्तनयः सन् श्रीनिवासाख्यः ।
विप्रो वाजसनेयी ग्रन्थं प्रस्तारशेखरं कुरुते ॥ ३ ॥
अयं ग्रन्थो विजयतां नाम्ना प्रस्तारशेखरः ।
प्रस्तारकौशलं सर्वं यदतो नातिरिच्यते ॥ ४ ॥
वर्णानां मात्राणां छन्दः प्रस्तारये तदीयगणैः ।
विषमानुष्टुभमार्यां शब्दान् प्रस्तारये स्वरांश्चापि ॥ ५ ॥
उक्तात्युक्ता मध्या तथा प्रतिष्ठा च सुप्रतिष्ठा च ।
गायत्र्युष्णिगनुष्टुब् बृहती पङ्क्तिस्तथा त्रिष्टुप् ॥ ६ ॥
जगती पुनरतिजगती शक्वर्यतिशक्वरी तथैवाष्टिः ।
अत्यष्टिर्धृतिरधृतिरथ च कृतिः प्रकृतिराकृतिर्विकृति ॥
संस्कृतिरतिकृतिरुत्कृतिरिति षड्विंशतिविधं स्मृतं छन्दः ।
तावत्कं छन्दः स्यात्पादो यावद्भिरक्षरैर्घटितः ॥ ८ ॥

Colophon :

सत्प्रीत्यै श्रीनिवासेन कृते प्रस्तारशेखरे ।
वर्णप्रस्तारकथनादध्यायः प्रथमोऽभवत् ॥

End :

आद्यात्स्वरादेकसंख्यां सप्तभिर्वर्धयेत्क्रमात् ।
स्वरोपान्त्यान्तया वृद्धां सैकां चोद्दिष्टमादिशेत् ॥१३॥
सप्तस्वेको विविक्तश्चेद्यथार्हः प्राक्स्वरो भवेत् ।
श्लिष्टश्चेत्सप्तभागोर्ध्वो लब्धं त्वेकेन योजयेत् ॥ १४ ॥
तस्मिन्विविक्ते तद्रीत्या श्लिष्टे स्याच्छ्लिष्ट ईरितः ।
नाङ्कि छन्दोऽर्थ एकः स्यादित्थं नष्टं समुद्धरेत् ॥१५॥
सप्त च्छन्दःस्वेवं नव लक्षाण्युदभवन्स्वरविभेदाः ।
तदुपरि षष्टिसहस्राण्यपि सप्त शतानि नवतिरपि नव च ॥
केवलं विनिमयेन निश्चिताः
स्थूलदृष्टिपथगोचराः स्वराः ।
कालतो विनिमयेन निर्णयेत्
कालकण्ठधिषणापि विभ्रमेत् ॥ १७ ॥

Colophon :

सत्प्रीत्यै श्रीनिवासेन कृते प्रस्तारशेखरे ।
स्वरप्रस्तारनामायं षष्ठोऽध्यायश्च संवृतः ॥ १८ ॥
श्रीनिवासः प्रतस्तार ग्रन्थं प्रस्तारशेखरम् ।
पश्यन्त्वाचन्द्रमस्तारं सविस्तारं बुधोत्तमाः ॥ १९ ॥

749. 9. J. 13.

प्राकृतछन्दःसूत्रम्

Paper. 138 Foll. 8 × 5⅜ inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This is a metrical exposition of Prākṛta metres written in Prākṛta language. The author's name is not known. The verses given in illustrations are mostly the author's own. The work strictly follows the rules of Piṅgala *alias* Piṅgalanāga who is said to have written first works on prosody. His Chandassūtra on Sanskrit metres has been described in the Vol. I—Vedic, of the Des. Catalogue of Sanskrit MSS. in the Adyar Library, 1942 and was printed and published with Halāyudha's commentary by the Asiatic Society of Bengal in 1874. But his Sūtras on Prākṛta metres are not available anywhere. Piṅgala has nothing to do with the work under description except that his rules are followed by the author. Though the work is written in verse, it is designated as Prākṛtachandassūtra in literary works, because it occupies the place of original sūtras of Piṅgala. As regards the date of the work the following facts may be taken in to consideration. The name of Hammir, the great Rajaput king, is mentioned in the work. His reign commenced in 1302 A.D. and extended over 60 years. The name of Caṇḍes'vara, the minister of Harasiṁhadeva, is mentioned in the work. Caṇḍes'vara is known to have written many works on Dharmas'āstra and in one of them *namely* Vivādaratnākara he gives the date of composition as Saka year 1236 corresponding to 1314 A.D. (Vide No. 1390 of the India Office Library Catalogue.) Therefore the work may be assigned to the last part of the 14th Century A.D. as earliest. The work is divided into two parts the first dealing with Mātrāvṛtta and the second Varṇa-

vṛtta. There are two different editions of this work. The first edition was printed in the Nirṇayasāgar Press, Bombay in 1894 with the title Prākṛtapiṅgalasūtra with the commentary by Lakṣmīnātha-bhaṭṭa. The second edition was published by the Asiatic Society, of Bengal in 1902 with the title Prākṛtapiṅgalam with the commentaries by Vis'vanātha, Vaṁs'īdhara, Kṛṣṇa, and Yādavendra. The MS. contains also a commentary on the work in each page up and down the text.

The MS. breaks off in the 210th verse of the 2nd chapter.

Beginning :

जो विविहमत्तसाअरपारं पत्तो वि विमळमइहेळं ।
पढमं भासतरंडो णाओसो पिंगळो जअइ ॥
दीहो संजुत्तपरो बिंदुजुओ पाडिओअचळणं ते ।
स गुरूवंकदुमत्तो अण्णो ळहु होइ सुद्ध एक्कअळो ॥

जहा—

माईरुएहेओ हिण्णो जिण्णो अ बुड्ढओ देओ ।
संभुं कामंती सा गोरी गहिळत्तणं कुणइ ॥

End :

जहा—

जं फुल्लकमलवण वहइ लहु पवण भमइ भमरकुल दिसि विदिसं ।
झंकार पलइ वण रवइ कोइलगण विरहिगणमुह-अइविरसं ।
आणंदिअजुअजणउलसु रहसमण सरसणलिणीदलकि-असअणा ।
पलइ सिसिररिउ दिवसदिहर भउ कुसुमसमअ अव-अरिअवणा ॥ २१० ॥

750. 9. J. 13.

प्राकृतछन्दःसूत्रव्याख्या

Paper. 138 Foll. 8 × 5⅜ inches. 12 lines in page. Devanāgarī script. Old. Slightly injured. Good writing.

This is a commentry on the Prākṛta-chandassūtra described under last number. The author's name is not mentioned. This commentary is different from those of Vis'vanātha, Vaṁs'īdhara, Kṛṣṇa, Yādava and Lakṣhmīnātha which are available in print.

Breaks off in the 210th verse in the 2nd chapter.

Beginning :

गरुडवञ्चनारूपगुरुबुद्धिमाहात्म्यान्तरेण स पिङ्गलो जयति । स कः ? यो णाओ ज्ञातः अर्थात् गरुडेन । णाओ इति ज्ञो ण इति णः । पिङ्गलनाम्ना शेषनागोऽयं ब्राह्मणरूपस्तिष्ठतीति ज्ञातः । कीदृशः ? विविधमात्रासागरं प्राप्तः । प्रथमं भाषातरण्डः प्रस्तारं कर्तुं देहीति वाणी नौर्यस्य । पारालिन्दी तरण्डो नौरिति हारावली । संस्कृते आदिकविर्वाल्मीकिः । प्राकृते शालिवाहनः । भाषाकाव्ये पिङ्गलः । अत एव प्रथमपदोपादानम् । विः पक्षी । प्रकरणात् गरुडः । तस्य विमला या मतिस्तस्या हेला अनादरो यथा भवतीति मदनः । मत्या हेला यथा भवतीति रविकरः । विविधा मात्रा धनं यस्य सागरस्येत्यन्ये । प्रसिद्धं च लोके— यथा किल गरुडेन पिङ्गलनागो भोक्तुं धृतः । स च ब्राह्मणवेषधारी अहं कविः, मम कवित्वकौशलं पश्येति यदेकत्र लिखामि न तदन्यत्रेति यद्येकाकारमङ्कं पश्यसि तदा मां खादिष्यसीत्युक्तम् । तेनानुमतः षड्विंशत्यक्षरप्रस्तारं कृत्वा समुद्रतीरपर्यन्तं वञ्चयित्वा जलं प्रविवेशेति । आर्या छन्दः ।

End :

फुल्लं कमलवनं पवन: समीरणो लघु मन्दं वहति । भ्रमरकुलं दिक्षु विदिक्षु भ्रमति । किंच वने झंकार: पतितः । यत: कोकिलगण: पिकनिकरो विरहिगणानां मुखे संमुखे अतिविरसं यथा स्यात् तथा रौति कूजतीत्यर्थ: । यत्र च आनन्दिता युवजना: । उल्लसितं रससान्मनो यस्मिन्नेवंविध: सरसनलिनीदलकृतशयन: कुसुमसमय आगतो वने सिसिररिउ शिशिरर्तु: पल्लट्ट: प्रत्यावृत्त: । अत एव वसन्तसमयारम्भदिवसा दीर्घा जाता इति ॥ २१० ॥

751. 11. D. 23.

वाणीभूषणम्—दामोदरमिश्रकृतम्

Paper. 18 Foll. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

A metrical treatise dealing with Prākṛta metres by Dāmodaramis'ra of Dīrghayoṣa family. The work is written in Sanskrit and gives Sanskrit illustrations for the metres dealt with. As Haribhāskara mentions this work in his Vṛttaratnākara-vyākhyā which is dated Saṁ. 1733= 1676 A.D. it is presumed that the author Dāmodaramis'ra must have lived before 1676 A.D. (Vide, India Office Library Catalogue No. 1091, page 303, part II). The work has been printed in the Nirnayasagar Press, Bombay in 1895 and the edition contains the following colophon : इति मैथिलदीर्घयोषकुलोद्भूतदामोदरमिश्रविरचितवाणीभूषणं समाप्तम् । From this it is understood that the author belonged to Mithila country. The work is divided into two adhyāyas *namely* Mātrāvṛtta and Varṇavṛtta.

The MS. is almost complete.

Beginning :

राजत्कुञ्जरराजकृत्ति विमलोदञ्चद्दुकूलावलि
भ्राजद्भोगिफणामणि प्रविलसन्मुक्तामणिग्रामणि ।
पादाम्भोजभुजङ्गफूत्कृति रणन्मञ्जीरमञ्जुद्युति
श्रेयो व: शिवशैलराजसुतयोर्देयादभिन्नं वपु: ॥
दीर्घयोषकुलोद्भूतो दामोदर इति श्रुत: ।
छन्दसां लक्षणं तेन सोदाहरणमुच्यते ॥ २ ॥
सन्तीह यद्यपि महाकविसंप्रणीत-
ग्रन्थास्तथापि मम बालिशताविलास:
संपूर्णशारदविधावुदयं प्रपन्ने
किं नाम नाभ्युदयमञ्चति तारकापि ॥ ३ ॥
अलसधिय: प्राकृतमधि सुधिय: केचिद्भवन्तीह ।
कृतिरेषा मम तेषामातनुतामीषदपि तोषम् ॥ ४ ॥
संयोगपूर्वं सविसर्गकं च दीर्घस्वरै: संगतमन्तगं वा ।
विद्यादनुस्वारसमन्वितं च गुर्वक्षरं वक्रमिह द्विमात्रम् ॥५॥
संयुक्तपूर्वोऽपि लघु: क्वचिरस्या-
द्वर्णस्तु प्रह्लादिगतो विभाषा ।
ए ओ क्वचित्प्राकृतके लघू स्त
ईही तथा बिन्दुयुते पठित्वा ॥ ६ ॥
टठडढणेति गणा: स्यु: षट्पञ्चचतुस्त्रियुग्ममात्राणाम् ।
तेषां त्रयोदशाष्टकपंञ्चत्रिद्विप्रभेदा: स्यु: ॥ ७ ॥
प्रथमगुरोरधरे लघु दत्वा शेषं समानमितरेण ।
उद्वृत्तं गुरु लघु वा प्रस्तार: सर्वलघु यावत् ॥ ८ ॥

Colophon :

इति श्रीदामोदरविरचिते वाणीभूषणे मात्रावृत्तं नाम प्रथमोऽध्याय: ।

End :

ऽ ॥ ऽ ॥ ॥ ऽ ॥ ऽ ॥ ऽ ॥ ऽ। ॥ ऽ ॥

कर्णद्विजवरगणत्रितयनगणमिह रचय ललितमधि कुसुमगणं नारीगणनगणकलितशरकुसुमसुकनककुसुमवरकृतरसनम। नागाधिपनिगदितमिति च परिसुखितसकलकविनृकुलमतिरुचिरं शार्दूरममलमिह कलय कमलमुखि सुखितविबुधजनहृदयम् ॥

यथा—

गोवर्धनगिरिधरमुपचितदितिसुतपरमहृदयमदशमनकरं . . . . ।

752. 20. I. 28.

वृत्तद्युमणिः—यशवन्तकृतः

Palm-leaf. 2 Foll. 14½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

A brief work on Sanskrit metres written in verse by Yas'avanta son of Gaṅgādhara of Viṣṇuvṛddha family.

Contains a very small portion in the beginning.

Beginning :

स्वीयजनप्रत्यूहध्वान्तद्युमणिर्दयोदपरिपूर्णः ।
रिपुचयखण्डनचण्डः करितुण्डो भवतु भक्तभव्याय ॥
शिवयोः सुधाहरिद्रादीप्तिमतोः सारभृज्जगत्पित्रोः ।
त्रिभुवनविघ्नध्वंसी करिकल्पः कश्चिदरुणिमा जयति ॥
अधरस्त्वमेव वा शुनदी हासः कलिन्दजा दृष्टिः ।
तव स स्मेरकटाक्षः स्नपयतु मामम्ब तीर्थराजोऽन्यः ॥

* * * *

छन्दःपारावाराद्विचिन्वतो वृत्तमौक्तिकश्रेणीः ।
श्रीमत्पिङ्गलनागप्रमुखाचार्यान् मुदा हृदा वन्दे ॥
यद्यपि सन्ति बुधाग्र्यग्रथितग्रन्था: सहस्रशो जगति ।
मद्वालिशतालीला तथापि काचिच्चिरंतनी स्फुरति ॥
पार्वणपीयूषांशावुदिते नो याति किं भमभ्युदयम् ।
कीरः किं वा तार्क्ष्यभ्रमिमुद्वीक्ष्य स्वकां गतिं त्यजति ॥
विविधग्रन्थविचारापटवः सन्तीह सालसाः केचित् ।
सचमत्कृतिकृतितस्त एव सन्तः सदा मुदं यान्तु ॥
श्रीविष्णुवृद्धमुनिकुलावतंसो जगत्युदारयशाः ।
अपरार्धचन्द्रचूडो नाम्ना गङ्गाधरः क्षितौ ख्यातः ॥
तत्तनुजो यशवन्तः श्रीपतिपादाम्बुजन्मलोलम्बः ।
वृत्तद्युमणिस्तेन क्रियतेऽसौ लक्ष्यलक्ष्मयुतः ॥
अच्छन्दः सच्छन्दो वाङ्मयमखिलं द्विधा विधातव्यम् ।
गद्यादिकमच्छन्दः सच्छन्दः स्पष्टमीर्यतेऽत्र मया ॥

End :

घातकरस्तु थकारो निखिलविनाशो नकारतो ज्ञेयः ।
धनधान्यक्षयकर्ता धकार इह रो रुजां तर्ति तनुते ॥
तनुसंक्षयं षकारः कुरुते भो राजतो महाभीतिम् ।
तस्मादनिष्टफलदानष्टौ वर्णांस्त्यजेद्धकारादीन् ॥

753. 40. E. 39.

वृत्तमौक्तिकम्—चन्द्रशेखरकृतम्

Paper. 31 Foll. 8½ × 5 inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

